# ॥ व्यासगीता ब्रह्मपुराणे ॥

.. Vyasagita from Brahma Purana ..

sanskritdocuments.org

December 9, 2017

# .. Vyasagita from Brahma Purana ..

# ॥ व्यासगीता ब्रह्मपुराणे ॥

## Sanskrit Document Information

Text title : vyAsagItAbrahmapurANAntargataM

File name : vyAsagItAbrahmapurANa.itx

Category : gItA, giitaa

Location : doc_giitaa

Translated by : Posted at http://www.astrojyoti.com/vyasagita.htm without author reference

Description-comments : adhyAya numbering is different than

Latest update : May 6, 2013

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

December 9, 2017

*sanskritdocuments.org*

# ॥ व्यासगीता ब्रह्मपुराणे ॥

अध्यायः २३४ (१२६)

आत्यन्तिकलयनिरूपणम्

व्यास उवाच

आध्यात्मिकादि भो विप्रा ज्ञात्वा तापत्रयं बुधः ।
उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम् ॥ २३४.१॥

आध्यात्मिकोऽपि द्विविधा शारीरो मानसस्तथा ।
शारीरो बहुभिर्भेदैर्भिद्यते श्रूयतां च सः ॥ २३४.२॥

शिरोरोगप्रतिश्यायज्वरशूलभगंदरैः ।
गुल्मार्शःश्वयथुश्वासच्छर्द्यादिभिरनेकधा ॥ २३४.३॥

तथाऽक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः ।
भिद्यते देहजस्तापो मानसं श्रोतुमर्हथ ॥ २३४.४॥

कामक्रोधभद्वेषलोभमोहविषादजः ।
शोकासूयावमानेर्ष्यामात्सर्याभिभवस्तथा ॥ २३४.५॥

मानसोऽपि द्विजश्रेष्ठास्तापो भवति नैकधा ।
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ॥ २३४.६॥

मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः ।
सरीसृपाद्यैश्च नृणां जन्यते चाऽऽधिभौतिकः ॥ २३४.७॥

शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः ।
तापो द्विजवरश्रेष्ठाः कथ्यते चाऽऽधिदैविकः ॥ २३४.८॥

गर्भजन्मजराज्ञानमृत्युनारकजं तथा ।
दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तमाः ॥ २३४.९॥

सुकुमारतनुर्गर्भे जन्तुर्बहुमलावृते ।

उल्बसंवेष्टितो भग्नपृष्ठग्रीवास्थिसंहतिः ॥ २३४.१०॥

अत्यम्लकटुतीक्ष्णोष्णलवणैर्मातृभोजनैः ।
अतितापिभिरत्यर्थं बाध्यमानोऽतिवेदनः ॥ २३४.११॥

प्रसारणाकुञ्चनादौ नागा(ङ्गा)नां प्रभुरात्मनः ।
शकृन्मूत्रमहापङ्कशायी सर्वत्र पीडितः ॥ २३४.१२॥

निरुच्छ्वासः सचैतन्यः स्मरञ्जन्मशतान्यथ ।
आस्ते गर्भेऽतिदुःखेन निजकर्मनिबन्धनः ॥ २३४.१३॥

जायमानः पुरीषासृङ्मूत्रशुक्राविलाननः ।
प्राजापत्येन वातेन पीड्यमानास्थिबन्धनः ॥ २३४.१४॥

अधोमुखस्तैः क्रियते प्रबलैः सूतिमारुतैः ।
क्लेशैर्निष्क्रान्तिमाप्नोति जठरान्मातुरातुरः ॥ २३४.१५॥

मूर्च्छामवाप्य महतीं संस्पृष्टो बाह्यवायुना ।
विज्ञानभ्रंसमाप्नोति जातस्तु मुनिसत्तमाः ॥ २३४.१६॥

कण्टकैरिव तुन्नाङ्गः क्रकचैरिव दारितः ।
पूतिव्रणान्निपतितो धरण्यां क्रिमिको यथा ॥ २३४.१७॥

कण्डूयनेऽपि चाशक्तः परिवर्तेऽप्यनीश्वरः ।
स्तनपानादिकाहारमवाप्नोति परेच्छया ॥ २३४.१८॥

अशुचिस्त्रस्तरे सुप्तः कीटदंशादिभिस्तथा ।
भक्ष्यमाणोऽपि नैवैषां समर्थो विनिवारणे ॥ २३४.१९॥

जन्मदुःखान्यनेकानि जन्मनोऽनन्तराणि च ।
बालभावे यदाप्नोति आधिभूतादिकानि च ॥ २३४.२०॥

अज्ञानतमसा छन्नो मूढान्तः करणो नरः ।
न जानाति कुतः कोऽहं कुत्र गन्ता किमात्मकः ॥ २३४.२१॥

केन बन्धेन बद्धोऽहं कारणं किमकारणम् ।
किं कार्यं किमकार्यं वा किं वाच्यं किं न चोच्यते ॥ २३४.२२॥

को धर्मः कश्च वाऽधर्मः कस्मिन्वर्तेत वै कथम् ।
किं कर्तव्यमकर्तव्यं किं वा किं गुणदोषवत् ॥ २३४.२३॥

एवं पशुसमैर्मूढैरज्ञानप्रभवं महत् ।
अवाप्यते नरैर्दुःखं शिश्नोदरपरायणैः ॥ २३४.२४॥

अज्ञानं तामसो भावः कार्यारम्भप्रवृत्तयः ।
अज्ञानिनां प्रवर्तन्ते कर्मलोपस्ततो द्विजाः ॥ २३४.२५॥

नरकं कर्मणां लोपात्फलमाहुर्महर्षयः ।
तस्मादज्ञानिनां दुःखमिह चामुत्र चोत्तमम् ॥ २३४.२६॥

जराजर्जरदेहश्च शिथिलावयवः पुमान् ।
विचलच्छीर्णदशनो वलिस्नायुशिरावृतः ॥ २३४.२७॥

दूरप्रनष्टनयनो व्योमान्तर्गततारकः ।
नासाविवरनिर्यातरोमपुञ्जश्चलद्वपुः ॥ २३४.२८॥

प्रकटीभूतसर्वास्थिर्नतपृष्ठास्थिसंहतिः ।
उत्सन्नजठराग्नित्वादल्पाहारोल्पचेष्टितः ॥ २३४.२९॥

कृच्छ्रचंक्रमणोत्थानशयनासनचेष्टितः ।
मन्दीभवच्छ्रोत्रनेत्रगलल्लालाविलाननः ॥ २३४.३०॥

अनायत्तैः समस्तैश्च करणैर्मरणोन्मुखः ।
तत्क्षणेऽप्यनुभूतानामस्मर्ताऽखिलवस्तुनाम् ॥ २३४.३१॥

सकृदुच्चारिते वाक्ये समुद्भूतमहाश्रमः ।
श्वासकासामयायाससमुद्भूतप्रजागरः ॥ २३४.३२॥

अन्येनोत्थाप्यतेऽन्येन तथा संवेश्यते जरी ।
भृत्यात्मपुत्रदाराणामपमानपराकृतः ॥ २३४.३३॥

प्रक्षीणाखिलशौचश्च विहाराहारसंस्पृहः ।
हास्यः परिजनस्यापि निर्विण्णाशेषबान्धवः ॥ २३४.३४॥

अनुभूतमिवान्यस्मिञ्जन्मन्यात्मविचेष्टितम् ।
संस्मरन्यौवने दीर्घं निःश्वसित्यतितापितः ॥ २३४.३५॥

एवमादीनि दुःखानि जरायामनुभूय च ।
मरणे यानि दुःखानि प्राप्नोति शृणु तान्यपि ॥ २३४.३६॥

श्लथग्रीवाङ्घ्रिहस्तोऽथ प्राप्तो वेपथुना नरः ।
मुहुर्ग्लानिपरश्चासौ मुहुर्ज्ञानबलन्वितः ॥ २३४.३७॥

हिरण्यधान्यतयभार्याभृत्यगृहादिषु ।
एते कथं भविष्यन्तीत्यतीवममताकुलः ॥ २३४.३८॥

मर्मविद्भिर्महारोगैः क्रकचैरिव दारुणैः ।
शरैरिवान्तकस्योग्रैश्छिद्यमानास्थिबन्धनः ॥ २३४.३९॥

परिवर्तमानताराक्षिहस्तपादं मुहुः क्षिपन् ।
संशुष्यमाणताल्वोष्ठकण्ठो घुरघुरायते ॥ २३४.४०॥

निरुद्धकण्ठदेशीऽपि उदानश्वासपीडितः ।
तापेन महता व्याप्तस्तृषा व्याप्तस्तथा क्षुधा ॥ २३४.४१॥

क्लेशादुत्क्रान्तिमाप्नोति याम्यकिंकरपीडितः ।
तापेन महात व्याप्तस्तृषा व्याप्तस्तथा क्षुधा ॥ २३४.४२॥

एतान्यन्यानि चोग्राणि दुःखानि मरणे नृणाम् ।
श्टणुध्वं दर्शं यानि प्राप्यन्ते पुरुषैर्मृतैः ॥ २३४.४३॥

याम्यकिंकरपाशादिग्रहणं दण्डताडनम् ।
यमस्य दर्शनं चोग्रमुग्रमार्गविलोकनम् ॥ २३४.४४॥

करम्भवालुकाविह्नियन्त्रशस्त्रादिभीषणे ।
प्रत्येकं यातनायाश्च यातनादि द्विजोत्तमाः ॥ २३४.४५॥

क्रकचैःपीड्यमानानांमृ(मू)षायां चापि ध्माप्यताम् ।
कुठारैः पाट्यमानानांभूमौ चापि निखन्यताम् ॥ २३४.४६॥

शूलेष्वारोप्यमाणानां व्याघ्रवक्त्रे प्रवेश्यताम् ।
गृध्रैः संभक्ष्यमाणानां द्वीपिभिश्चोपभुज्यताम् ॥ २३४.४७॥

क्वथ्यतां तैलमध्ये च क्लिद्यतां क्षारकर्दमे ।
उच्चान्निपात्यमानानां क्षिप्यतां क्षेपयन्त्रकैः ॥ २३४.४८॥

नरके यानि दुःखानि पापहेतूद्भवानि वै ।
प्राप्यन्ते नारकैर्विप्रास्तेषां संख्या न विद्यते ॥ २३४.४९॥

न केवलं द्विजश्रेष्ठा नरके दुःखपद्धतिः ।
स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः ॥ २३४.५०॥

पुनश्च गर्भो भवति जायते च पुनर्नरः ।

गर्भे विलीयते भूयो जायमानोऽस्तमेति च ॥ २३४.५१॥

जातमात्रश्च म्रियते बालभावे च यौवने ।
यद्यत्प्रीतिकरं पुंसां वस्तु विप्राः प्रजायते ॥ २३४.५२॥

तदेव दुःखवृक्षस्य बीजत्वमुपगच्छति ।
कलत्रपुत्रमित्रादिगृहक्षेत्रधनादिकैः ॥ २३४.५३॥

क्रियते न तथा भूरि सुखं पुंसां यथाऽसुखम् ।
इति संसारदुःखार्कतापतापितचेतसाम् ॥ २३४.५४॥

विमुक्तिपादपच्छायामृते कुत्र सुखं नृणाम् ।
तदस्य त्रिविधस्यापि दुःखजातस्य पण्डितैः ॥ २३४.५५॥

गर्भजन्मजराद्येषु स्थानेषु प्रभविष्यतः ।
निरस्तातिशयाह्लादं सुखभावैकलक्षणम् ॥ २३४.५६॥

भेषजं भगवत्प्राप्तिरेका चाऽऽत्यन्तिकी मता ।
तस्मात्तत्प्राप्तये यत्नः कर्तव्यः पण्डितैर्नरैः ॥ २३४.५७॥

तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं द्विजोत्तमाः ।
आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते ॥ २३४.५८॥

शब्दब्रह्माऽऽगममयं परं ब्रह्म विवेकजम् ।
अन्धं तम इवाज्ञानं दीपवच्चेन्द्रियोद्भवम् ॥ २३४.५९॥

यथा सूर्यस्तथा ज्ञानं यद्वै विप्रा विवेकजम् ।
मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तमाः ॥ २३४.६०॥

तदेतच्छ्रुयतामत्र संबन्धे गदतो मम ।
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ॥ २३४.६१॥

शब्दब्रह्मणि निष्णातः परं ब्रह्मधिगच्छति ।
द्वे विद्ये वेदितव्ये इति चाऽऽथर्वणी श्रुतिः ॥ २३४.६२॥

परया ह्यक्षरप्राप्तिर्ऋग्वेदादिमयाऽपरा ।
यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम् ॥ २३४.६३॥

अनिर्देश्यमरूपं च पाणिपादाद्यसंयुतम् ।
वित्तं सर्वगतं नित्यं भूतयोनिमकारणम् ॥ २३४.६४॥

व्याप्यं व्याप्यं यतः सर्वं तद्वै पश्यन्ति सूरयः ।
तद्ब्रह्म परमं धाम तद्ध्येयं मोक्षकाङ्क्षिभिः ॥। २३४.६५॥

श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम् ।
उत्पत्तिं प्रलयं चैव भूतानामगतिं गतिम् ॥ २३४.६६॥

वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ।
ज्ञानशक्तिबलवैश्वर्यवीर्यतेजांस्यशेषतः ॥ २३४.६७॥

भगवच्छब्दवाच्यानि च स वाच्यो भगवानिति ।
ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ॥ २३४.६८॥

भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृतः ।
उवाचेदं महर्षिभ्यः पुरा पृष्टः प्रजापतिः ॥ २३४.६९॥

नामाव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः ।
भूतेषु वसते योऽन्तर्वसन्त्यत्र च तानि यत्॥

धाता विधाता जगतां वासुदेवस्ततः प्रभुः ॥ २३४.७०॥

ससर्वभूतप्रकृतिर्गुणांश्च, दोषांश्च सर्वान्स(न)गुणो ह्यतीतः ।
अतीतसर्वावरणोऽखिलात्मा, तेनाऽऽवृतं यद्भुवनान्तरालम् ॥ २३४.७१॥

समस्तकल्याणगुणात्मको हि, स्वशक्तिलेशादृतभूतसर्गः ।
इच्छागृहीताभिमतोरुदेहः, संसाधिताशेषजगद्धितोऽसौ ॥ २३४.७२॥

तेजोबलैश्वर्यमहावरोधः, स्ववीर्यशक्त्यादिगुणैकराशिः ।
परः पराणां सकला न यत्र, क्लेशादयः सन्ति परापरेशे ॥ २३४.७३॥

स ईश्वरो व्यष्टिसमष्टिरूपोऽव्यक्तस्वरूपः प्रकटस्वरूपः ।
सर्वेश्वरः सर्वदृक्सर्ववेत्ता, समस्तशक्तिः परमेश्वराख्यः ॥ २३४.७४॥

संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम् ।
संदृश्यते वाऽऽप्यथ गम्यते वा,तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥ २३४.७५॥

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवाद आत्यन्तिकलयनिरूपणं नाम चतुस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३४॥

---

अध्यायः २३५ (१२७)

योगाभ्यासनिरूपणम्

मुनय ऊचुः
इदानीं ब्रूहि योगं च दुःखसंयोगभेषजम् ।
यं विदित्वाऽव्ययं तत्र युञ्जामः पुरुषोत्तमम् ॥ २३५.१॥

श्रुत्वा स वचनं तेषां कृष्णद्वैपायनस्तदा ।
अब्रवीत्परमप्रीतो योगी योगविदां वरः ॥ २३५.२॥

योगं वक्ष्यामि भो विप्राः शृणुध्वं भवनाशनम् ।
यमभ्यस्याऽऽप्नुयाद्योगी मोक्षं परमदुर्लभम् ॥ २३५.३॥

श्रुत्वाऽऽदौ योगशास्त्राणि गुरुमाराध्य भक्तितः ।
इतिहासं पुराणं च वेदांश्चैव विचक्षणः ॥ २३५.४ ।
आहारं योगदोषांश्च देशकालं च बुद्धिमान् ।
ज्ञात्वा समभ्यसेद्योगं निर्द्वंद्वो निष्परिग्रहः ॥ २३५.५॥

भुञ्जन्सक्तुं यवागूं च तक्रमूलफलं पयः ।
यावकं कणपिण्याकमाहारं योगसाधनम् ॥ २३५.६॥

न मनोविकले ध्माते न श्रान्ते क्षुधिते तथा ।
न द्वंद्वे न च शीते च न चोष्णे नानिलात्मके ॥ २३५.७॥

सशब्दे न जलाभ्यासे जीर्णगोष्ठे चतुष्पथे ।
सरीसृपे श्मशाने च न नद्यन्तेऽग्निसंनिधौ ॥ २३५.८॥

न चैत्ये न च वल्मीके सभये कूपसंनिधे ।
न शुष्कपर्णनिचये योगं युञ्जीत कर्हिचित् ॥ २३५.९॥

देशानेताननादृत्य मूढत्वाद्यो युनक्ति वै ।
प्रवक्ष्ये तस्य ये दोषा जायन्ते विघ्नकारकाः ॥ २३५.१०॥

बाधिर्यं जडता लोपः स्मृतेर्मूकत्वमन्धता ।
ज्वरश्च जायते सद्यस्तद्वदज्ञानसंभवः ॥ २३५.११॥

तस्मात्सर्वात्मना कार्या रक्षा योगविदा सदा ।
धर्मार्थकाममोक्षणां शरीरं साधनं यतः ॥ २३५.१२॥

आश्रमे विजने गुह्ये निःशब्दे निर्भये नगे ।
शून्यागारे शुचौरम्ये चैकान्ते देवतालये ॥ २३५.१३॥

रजन्याः पश्चिमे यामे पूर्वे च सुसमाहितः ।

पूर्वाह्णे मध्यमे चाह्नि युक्ताहारो जितेन्द्रियः ॥ २३५.१४॥

आसीनः प्राङ्मुखो रम्य आसने सुखनिश्चले ।
नातिनीचे न चोच्छ्रिते निस्पृहः सत्यवाक्शुचिः ॥ २३५.१५॥

युक्तनिद्रो जितक्रोधः सर्वभूतहिते रतः ।
सर्वद्वंद्वसहो धीरः समकायाङ्घ्रिमस्तकः ॥ २३५.१६॥

नाभौ निधाय हस्तौ द्वौ शान्तः पद्मासने स्थितः ।
संस्थाप्य दृष्टिं नासाग्रे प्राणानायम्य वाग्यतः ॥ २३५.१७॥

समाहृत्येन्द्रियग्रामं मनसा हृदये मुनिः ।
प्रणवं दीर्घमुद्यम्य संवृतास्यः सुनिश्चलः ॥ २३५.१८॥

रजसा तमसो वृत्तिं सत्त्वेन रजसस्तथा ।
संछाद्य निर्मलं शान्ते स्थितः संवृतलोचनः ॥ २३५.१९॥

हृत्पद्मकोटरे लीनं सर्वव्यापि निरञ्जनम् ।
युञ्जीत शान्ते स्थितः संवृतलोचनः ॥ २३५.२०॥

करणेन्द्रियभूतानि क्षेत्रज्ञे प्रथमं न्यसेत् ।
क्षेत्रज्ञश्च परे योज्यस्ततो युञ्जति योगवित् ॥ २३५.२१॥

मनो यस्यान्तमभ्येति परमात्मनि चञ्चलम् ।
संत्यज्य विषयांस्तस्य योगसिद्धिः प्रकाशिता ॥ २३५.२२॥

यदा निर्विषयं चित्तं परे ब्रह्मणि लीयते ।
समाधौ योगयुक्तस्य तदाऽभ्येति परं पदम् ॥ २३५.२३॥

असंसक्तं यदा चित्तं योगिनः सर्वकर्मसु ।
भवत्यानन्दमासाद्य तदा निर्वाणमृच्छति ॥ २३५.२४॥

शुद्धं धामत्रयातीतं तुर्याख्यं पुरुषोत्तमम् ।
प्राप्य योगबलाद्योगी मुच्यते नात्र संशयः ॥ २३५.२५॥

निःस्पृहः सर्वकामेभ्यः सर्वत्र प्रियदर्शनः ।
सर्वत्रानित्यबुद्धिस्तु योगी मुच्येत नान्यथा ॥ २३५.२६॥

इन्द्रियाणि न सेवेन वैराग्येण च योगवित् ।
सदा चाभ्यासयोगेन मुच्यते नात्र संशयः ॥ २३५.२७॥

न च पद्मासनाद्योगो न नासाग्रनिरीक्षणात् ।
मनसश्चेन्द्रियाणां च संयोगो योग उच्यते ॥ २३५.२८॥

एवं मया मुनिश्रेष्ठा योगः प्रोक्तो विमुक्तिदः ।
संसारमोक्षहेतुश्च किमन्यच्छ्रोतुमिच्छथ ॥ २३५.२९॥

लोमहर्षण उवाच
श्रुत्वा ते वचनं तस्य साधु साध्विति चाब्रुवन् ।
व्यासं प्रशस्य सम्पूज्य पुनः प्रष्टुं समुद्यताः ॥ २३५.३०॥

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे योगाभ्यासनिरूपणं नाम
पञ्चत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३५॥

---

अध्यायः २३६ (१२८)
सांख्ययोगनिरूपणम्
मुनय ऊचुः
तव वक्त्राब्धिसंभूतममृतं वाङ्मयं मुने ।
पिबतां नो द्विजश्रेष्ठ न तृप्तिरिह दृश्यते ॥ २३६.१॥

तस्माद्योगं मुने ब्रूहि विस्तरेण विमुक्तिदम् ।
सांख्यं च द्विपदां श्रेष्ठ श्रोतुमिच्छामहे वयम् ॥ २३६.२॥

प्रज्ञावाञ्श्रोत्रियो यज्वा ख्यातः प्राज्ञोऽनसूयकः ।
सत्यधर्ममतिर्ब्रह्मन्कथं ब्रह्माधिगच्छति ॥ २३६.३॥

तपसा ब्रह्मचर्येण सर्वत्यागेन मेधया ।
सांख्ये वा यदि वा योग एतत्पृष्टो वदस्व नः ॥ २३६.४॥

मनसश्चेन्द्रियाणां च यथैकाग्र्यमवाप्यते ।
येनोपायेन पुरुषस्तत्त्वं व्याख्यातुमर्हसि ॥ २३६.५॥

व्यास उवाच
नान्यत्र ज्ञानतपसोर्नान्यत्रेन्द्रियनिग्रहात् ।
नान्यत्र सर्वसंत्यागात्सिद्धिं विन्दति कश्चन ॥ २३६.६॥

महाभूतानि सर्वाणि पूर्वसृष्टिः स्वयंभुवः ।
भूयिष्ठं प्राणभृद्ग्रामे निविष्टानि शरीरिषु ॥ २३६.७॥

भूमेर्देहो जलात्स्नेहो ज्योतिषश्चक्षुषी स्मृते ।
प्राणापानाश्रयो वायुःकोष्ठाकाशं शरीरिणाम् ॥ २३६.८॥

क्रान्तौ विष्णुर्बले शक्रः कोष्ठेऽग्निर्भोक्तुमिच्छति ।
कर्णयोः प्रदिशः श्रोत्रे जिह्वायां वाक्सरस्वती ॥ २३६.९॥

कर्णौ त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
दश तानीन्द्रियोक्तानि द्वाराण्याहारसिद्धये ॥ २३६.१०॥

शब्दस्पर्शौ तथा रूपं रसं गन्धं च पञ्चमम् ।
इन्द्रियार्थान्पृथग्विद्यादिन्द्रियेभ्यस्तु नित्यदा ॥ २३६.११॥

इन्द्रियाणि मनो युङ्क्ते अवश्या(शा)निव राजिनः(लः) ।
मनश्चापि सदा युङ्क्ते भूतात्मा हृदयाश्रितः ॥ २३६.१२॥

इन्द्रियाणां तथैवैषां सर्वेषामीश्वरं मनः ।
नियमे च विसर्गे च भूतात्मा मनसस्तथा ॥ २३६.१३॥

इन्द्रियाणीन्द्रियार्थश्च स्वभावश्चेतना मनः ।
प्राणापानौ च जीवश्च नित्यं देहेषु देहिनाम् ॥ २३६.१४॥

आश्रयो नास्ति सत्त्वस्य गुणशब्दो न चेतनाः ।
सत्त्वं हि तेजः सृजति न गुणान्वै कथंचन ॥ २३६.१५॥

एवं सप्तदशं देहं वृतं षोडशभिर्गुणैः ।
मनीषी मनसा विप्राः पश्यत्यात्मानमात्मनि ॥ २३६.१६॥

न ह्ययं चक्षुषा दृश्यो न च सर्वैरपीन्द्रियैः ।
मनसा तु प्रदीप्तेन महानात्मा प्रकाशते ॥ २३६.१७॥

अशब्दस्पर्शरूपं तच्च(चा)रसागन्धमव्ययम् ।
अशरीरं शरीरे स्वे निरीक्षेत निरिन्द्रियम् ॥ २३६.१८॥

अव्यक्तं सर्वदेहेषु मर्त्येषु परमार्चितम् ।
योऽनुपश्यति स प्रेत्य कल्पते ब्रह्मभूयतः ॥ २३६.१९॥

विद्याविनयसम्पन्नब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ २३६.२०॥

स हि सर्वेषु भूतेषु जङ्गमेषु ध्रुवेषु च ।
वसत्येको महानात्मा येन सर्वमिदं ततम् ॥ २३६.२१॥

सर्वभूतेषु चाऽऽत्मानं सर्वभूतानि चाऽऽत्मनि ।
यदा पश्यति भूतात्मा ब्रह्म सम्पद्यते तदा ॥ २३६.२२॥

यावानात्मनि वेदाऽऽत्मा तावानात्मा परात्मनि ।
य एवं सततं वेद सोऽमृतत्वाय कल्पते ॥ २३६.२३॥

सर्वभूतात्मभूतस्य सर्वभूतहितस्य च ।
देवापि मार्गे मुह्यन्ति अपदस्य पदैषिणः ॥ २३६.२४॥

शकुन्तानामिवाऽऽकाशे मत्स्यानामिव चोदके ।
यथा गतिर्न दृश्येन तथा ज्ञानविदां गतिः ॥ २३६.२५॥

कालः पचति भूतानि सर्वाण्येवाऽऽत्मनाऽऽत्मनि ।
यस्मिस्तु पच्यते कालस्तन्न वेदेह कश्चन ॥ २३६.२६॥

न तदुर्ध्वं न तिर्यङ्क नाधो न च पुनः पुनः ।
न मध्ये प्रतिगृह्णीते नैव किंचिन्न कश्चन ॥ २३६.२७॥

सर्वे तत्स्था इमे लोका बाह्यमेषां न किंचन ।
यद्यप्यग्रे समागच्छेद्यता बाणो गुणच्युतः ॥ २३६.२८॥

नैवान्तं कारणस्येयाद्यद्यपि स्यान्मनोजवः ।
तस्मात्सूक्ष्मतरं नास्ति नास्ति स्थूलतरं तथा ॥ २३६.२९॥

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ २३६.३०॥

तदेवाणोरणुतरं तन्महद्भ्यो महत्तरम् ।
तदन्तः सर्वभूतानां ध्रुवं तिष्ठन्न दृश्यते ॥ २३६.३१॥

अक्षरं च क्षरं चैव द्वेधा भावोऽयमात्मनः ।
क्षकः सर्वेषु भूतेषु दिव्यं त्वमृतमक्षरम् ॥ २३६.३२॥

नवद्वारं पुरं कृत्वा हंसो हि नियतो वशी ।
ईदृशः सर्वभूतस्य स्थावरस्य चरस्य च ॥ २३६.३३॥

हानेनाभिविकल्पानां नराणां संचयेन च ।
शरीराणामजस्याऽऽहुर्हंसत्वं पारदर्शिनः ॥ २३६.३४॥

हंसोक्तं च क्षरं चैव कूटस्थं यत्तदक्षरम् ।

तद्विद्वानक्षरं प्राप्य जहाति प्राणजन्मनी ॥ २३६.३५॥

व्यास उवाच
भवतां पृच्छतां विप्रा यथावदिह तत्त्वतः ।
सांख्यं ज्ञानेन संयुक्तं तदेतत्कीर्तितं मया ॥ २३६.३६॥

योगकृत्यं तु भो विप्राः कीर्तयिष्याम्यतः परम् ।
एकत्वं बुद्धिमनसोरिन्द्रियाणां च सर्वशः ॥ २३६.३७॥

आत्मनो व्यापिनो ज्ञानं ज्ञानमेतदनुत्तमम् ।
तदेतदुपशान्तेन दान्तेनाध्यात्मशीलिना ॥ २३६.३८॥

आत्मारामेण बुद्धेन बोद्धव्यं शुचिकर्मणा ।
योगदोषान्समुच्छिद्य पञ्च यान्कवयो विदुः ॥ २३६.३९॥

कामं क्रोदं च लोभं च भयं स्वप्नं पञ्चमम् ।
क्रोधं शमेन जयति कामं संकल्पवर्जनात् ॥ २३६.४०॥

सत्त्वसंसेवनाद्धीरो निद्रामुच्छेत्तुमर्हति ।
धृत्या शिश्नोदरं रक्षेत्पाणिपादं च चक्षुषा ॥ २३६.४१॥

चक्षुः श्रोत्रं च मनसा मनो वाचं च कर्मणा ।
अप्रमादाद्भयं जह्याद्दम्भं प्राज्ञोपसेवनात् ॥ २३६.४२॥

एवमेतान्योगदोषाञ्जयेन्नित्यमतन्द्रितः ।
अग्नींश्च ब्राह्मणांश्चाथ देवताः प्रणमेत्सदा ॥ २३६.४३॥

वर्जयेदुद्धतां वाचं हिंसायुक्तां मनोनुगाम् ।
ब्रह्मतेजोमयं शुक्रं यस्य सर्वमिदं जगत् ॥ २३६.४४॥

एतस्य भूतभूतस्य दृष्टं स्थावरजङ्गमम् ।
ध्यायनमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा ॥ २३६.४५॥

शौचं चैवाऽऽत्मनः शुद्धिरिन्द्रियाणां च निग्रहः ।
एतैर्विवर्धते तेजः पाप्मानं चापकर्षति ॥ २३६.४६॥

समः सर्वेषु भूतेषु लभ्यालभ्येन वर्तयन्
धूतपाप्मा तु तेजस्वी लघ्वाहारो जितेन्द्रियः ॥ २३६.४७॥

तामत्रधौ वशे कृत्वा निषेवेद्ब्रह्मणः पदम् ।
मनसश्चेन्द्रियाणां च कृत्वैकाग्रयं समाहितः ॥ २३६.४८॥

पूर्वरात्रे परार्धे च धारयेन्मन आत्मनः ।
जन्तोः पञ्चेन्द्रियस्यास्य यद्येकं क्लिन्नमिन्द्रियम् ॥ २३६.४९॥

ततोऽस्य स्रवति प्रज्ञा गिरेः पादादिवोदकम् ।
मनसः पूर्वमादद्यात्कूर्माणामिव मत्स्यहा ॥ २३६.५०॥

ततः श्रोत्रं ततश्चक्षुर्जिह्वा घ्राणं च योगवित् ।
तत एतानि संयम्य मनसि स्थापयेद्यदि ॥ २३६.५१॥

तथैवापोह्य संकल्पान्मनो ह्यात्मनि धारयेत् ।
पञ्चेन्द्रियाणि मनसि हृदि संस्थापयेद्यदि ॥ २३६.५२॥

यदैतान्यवतिष्ठन्ते मनः षष्ठानि चाऽऽत्मनि ।
प्रसीदन्ति च संस्थायां तदा ब्रह्म प्रकाशते ॥ २३६.५३॥

विधूम इव दीप्तार्चिरागत्य इव दीप्तिमान् ।
वैद्युतोऽग्निरिवाऽऽकाशे पश्यन्त्यात्मानमात्मनि ॥ २३६.५४॥

सर्वं तत्र तु सर्वत्र व्यापकत्वाच्च दृश्यते ।
तं पश्यन्ति महात्मानो ब्राह्मणा ये मनीषिणः ॥ २३६.५५॥

धृतिमन्तो महाप्राज्ञाः सर्वभूतहिते रताः ।
एवं परिमितं कालमाचरन्संशितव्रतः ॥ २३६.५६॥

आसीनो हि रहस्येको गच्छेदक्षरसाम्यताम् ।
प्रमोहो भ्रम आवर्तो घ्राणं श्रवणदर्शने ॥ २३६.५७॥

अद्भुतानि रसः स्पर्शः शीतोष्णमारुताकृतिः ।
प्रतिभानुपसर्गांश्च प्रतिसंगृह्य योगतः ॥ २३६.५८॥

तांस्तत्त्वविदनादृत्य साम्येनैव निवर्तयेत् ।
कुर्यात्परिचयं योगे त्रैलोक्ये नियतो मुनिः ॥ २३६.५९॥

गिरिशृङ्गे तथा चैत्ये वृक्षमूलेषु योजयेत् ।
संनियम्येन्द्रियग्रामं कोष्ठे भाण्डमना इव ॥ २३६.६०॥

एकाग्रं चिन्तयेन्नित्यं योगान्नोद्विजते मनः ।
येनोपयेन शक्येत नियन्तुं चञ्चलं मनः ॥ २३६.६१॥

तत्र युक्तो निषेवेत न चैव विचलेत्ततः ।

शून्यागाराणि चैकाग्रो निवासार्थमुपक्रमेत् ॥ २३६.६२॥

नातिव्रजेत्परं वाचा कर्मणा मनसाऽपि वा ।
उपेक्षको यथाहारो लब्धालब्धसमो भवेत् ॥ २३६.६३॥

यश्चैनमभिनन्देत यश्चैनमभिवादयेत् ।
समस्तयोश्चाप्युभयोर्नाभिध्यायेच्छुभाशुभम् ॥ २३६.६४॥

न प्रहृष्येन लाभेषु नालाभेषु च चिन्तयेत् ।
समः सर्वेषु भूतेषु सधर्मा मातरिश्वनः ॥ २३६.६५॥

एवं स्वस्थात्मनः साधोः सर्वत्र समदर्शिनः ।
षण्मासान्नित्ययुक्तस्य शब्दब्रह्मभिवर्तते ॥ २३६.६६॥

वेदनार्तान्परान्दृष्ट्वा समलष्टाश्मकाञ्चनः ।
एवं तु निरतो मार्गं विरमेन्न विमोहितः ॥ २३६.६७॥

अपि वर्णावकृष्टस्तु नारी वा धर्मकाङ्क्षिणी ।
तावप्येतेन मार्गेण गच्छेतां परमां गतिम् ॥ २३६.६८॥

अजं पुराणमजरं सनातनं, यमिन्द्रियातिगमगोचरं द्विजाः ।
अवेक्ष्य चेमां परमेष्ठिसाम्यतां, प्रयान्त्यनावृत्तिगतिं मनीषिणः ॥ २३६.६९॥

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे सांख्ययोगनिरूपणं नाम
पञ्चत्रिंशदधिकद्विशततमोध्यायः ॥ २३६॥

---

## अध्यायः २३७ (१२९)

### ज्ञानिनां मोक्षप्राप्तिनिरूपणम्

मुनय ऊचुः
यद्येवं वेदवचनं कुरु कर्म त्यजेति च ।
कां दिशं विद्यया यान्ति कां च गच्छन्ति कर्मणा ॥ २३७.१॥

एतद्वै श्रोतुमिच्छमस्तद्भवान्प्रब्रवीतु नः ।
एतदन्योन्यवैरूप्यं वर्तते प्रतिकूलतः ॥ २३७.२॥

व्यास उवाच
शृणुध्वं मुनिशार्दूला यत्पृच्छध्वं समासतः ।
कर्मविद्यामयौ चौभौ व्याख्यास्यामि क्षराक्षरौ ॥ २३७.३॥

यां दिशं विद्यया यान्ति यां गच्छन्ति च कर्मणा ।
शृणुध्वं सांप्रतं विप्रा गहनं ह्येतदुत्तरम् ॥ २३७.४॥

अस्ति धर्म इति युक्तं नास्ति तत्रैव यो वदेत् ।
यक्षस्य सादृश्यमिदं यक्षस्येदं भवेदथ ॥ २३७.५॥

द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः ।
प्रवृत्तिलक्षणो धर्मो निवृत्तो वा विभाषितः ॥ २३७.६॥

कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥ २३७.७॥

कर्मणा जायते प्रेत्य मूर्तिमान्षोडशात्मकः ।
विद्यया जायते नित्यमव्यक्तं ह्यक्षरात्मकम् ॥ २३७.८॥

कर्म त्वेके प्रशंसन्ति स्वल्पबुद्धिरता नराः ।
तेन ते देहजालेन रमयन्त उपासते ॥ २३७.९॥

ये तु बुद्धिं परां प्राप्ता धर्मनैपुण्यदर्शिनः ।
न ते कर्म प्रशंसन्ति कूपं नद्यां पिबन्निवः ॥ २३७.१०॥

कर्मणां फलमाप्नोति सुखदुःखे भवाभवौ ।
विद्यया तदवाप्नोति यत्र गत्वा न शोचति ॥ २३७.११॥

न म्रियते यत्र गत्वा यत्र गत्वा न जायते ।
न जीर्यते यत्र गत्वा यत्र गत्वा न वर्धते ॥ २३७.१२॥

यत्र तद्ब्रह्म परममव्यक्तमचलं ध्रुवम् ।
अव्याकृतमनायामममृतं चाधियोगवित् ॥ २३७.१३॥

द्वंद्वैर्न यत्र बाध्यन्ते मानसेन च कर्मणा ।
समाः सर्वत्र मैत्राश्च सर्वभूतहिते रताः ॥ २३७.१४॥

विद्यामयोऽन्यः पुरुषो द्विजाः कर्ममयोऽपरः ।
विप्राश्चन्द्रसमस्पर्शः सूक्ष्मया कलया स्थितः ॥ २३७.१५॥

तदेतदृषिणा प्रोक्तं विस्तरेणानुगीयते ।
न वक्तुं शक्यते द्रष्टुं चक्रतन्तुमिवाम्बरे ॥ २३७.१६॥

एकादशविकारात्मा कलासंभारसंभृतः ।
मूर्तिमानिति तं विद्याद्विप्राः कर्मगुणात्मकम् ॥ २३७.१७॥

देवो यः संश्रितस्तस्मिन्बुद्धीन्दुरिव पुष्करे ।
क्षेत्रज्ञं तं विजानीयान्नित्यं योगजितात्मकम् ॥ २३७.१८॥

तमो रजश्च सत्त्वं च ज्ञेयं जीवगुणात्मकम् ।
जीवमात्मगुणं विद्यादात्मानं परमात्मनः ॥ २३७.१९॥

सचेतनं जीवगुणं वदन्ति, स चेष्टते जीवगुणं च सर्वम् ।
ततः परं क्षेत्रविदो वदन्ति, प्रकल्पयन्तो भुवनानि सप्त ॥ २३७.२०॥

व्यास उवाच
प्रकृत्यास्तु विकारा ये क्षेत्रज्ञास्ते परिश्रुताः ।
ते चैनं न प्रजानन्ति न जानाति स तानपि ॥ २३७.२१॥

तैश्चैव कुरुते कार्यं मनः षष्ठैरिहेन्द्रियैः ।
सुदान्तैरिव संयन्ता दृढः परमवाजिभिः ॥ २३७.२२॥

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यः परमं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ २३७.२३॥

महतः परमव्यक्तमव्यक्तात्परतोऽमृतम् ।
अमृतान्न परं किंचित्सा काष्ठा परमा गतिः ॥ २३७.२४॥

एवं सर्वेषु भूतेषु गूढात्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ २३७.२५॥

अन्तरात्मनि संलीय मनःषष्ठानि मेधया ।
इन्द्रियैरिन्द्रियार्थांश्च बहुचित्तमचिन्तयन् ॥ २३७.२६॥

ध्यानेऽपि परमं कृत्वा विद्यासम्पादितं मनः ।
अनीश्वरः प्रशान्तात्मा ततो गच्छेत्परं पदम् ॥ २३७.२७॥

इन्द्रियाणां तु सर्वेषां वश्यात्मा चलितस्मृतिः ।
आत्मनः सम्प्रदानेन मर्त्यो मृत्युमुपाश्नुते ॥ २३७.२८॥

विहत्य सर्वसंकल्पान्सत्त्वे चित्तं निवेशयेत् ।
सत्त्वे चित्तं समावेश्य ततः कालंजरो भवेत् ॥ २३७.२९॥

चित्तप्रसादेन यतिर्जहातीह शुभाशुभम् ।
प्रसन्नात्माऽऽत्मनि स्थित्वा सुखमत्यन्तमश्नुते ॥ २३७.३०॥

लक्षणं तु प्रसादस्य यथा स्वप्ने सुखं भवेत् ।
निर्वाते वा यथा दीपो दीप्यमानो न कम्पते ॥ २३७.३१॥

एवं पूर्वापरे रात्रे युञ्जन्नात्मानमात्मना ।
लघ्वाहारो विशुद्धात्मा पश्यत्यात्मानमात्मनि ॥ २३७.३२॥

रहस्यं सर्ववेदानामनैतिह्यमनागमम् ।
आत्मप्रत्यायकं शास्त्रमिदं पुत्रानुशासनम् ॥ २३७.३३॥

धर्माख्यानेषु सर्वेषु सत्याख्यानेषु यद्वसु ।
दशवर्षसहस्राणि निर्मथ्यामृतमुद्धृतम् ॥ २३७.३४॥

नवनीतं यथा दध्नः काष्ठादग्निर्यथैव च ।
तथैव विदुषां ज्ञानं मुक्तिहेतोः समुद्धृतम् ॥ २३७.३५॥

स्नातकानामिदं शास्त्रं वाच्यं पुत्रानुशासनम् ।
तदिदं नाप्रशान्ताय नादान्ताय तपस्विने ॥ २३७.३६॥

नावेदविदुषे वाच्यं तथा नानुगताय च ।
नासूयकायानृजवे न चानिर्दिष्टकारिणे ॥ २३७.३७॥

न तर्कशास्त्रदग्धाय तथैव पिशुनाय च ।
श्लाघिने श्लाघनीयाय प्रशान्ताय तपस्विने ॥ २३७.३८॥

इदं प्रियाय पुत्राय शिष्यायानुगताय तु ।
रहस्यधर्मं वक्तव्यं नान्यस्मै तु कथंचन ॥ २३७.३९॥

यदप्यस्य महीं दद्याद्रत्नपूर्णामिमां नरः ।
इतमेव ततः श्रेय इति मन्येत तत्त्ववित् ॥ २३७.४०॥

अतो गुह्यतरार्थं तदध्यात्ममतिमानुषम् ।
यत्तन्महर्षिभिर्दुष्टं वेदान्तेषु च गीयते ॥ २३७.४१॥

तद्युष्मभ्यं प्रयच्छामि यन्मां पृच्छत सत्तमाः ।
यन्मे मनसि वर्तेत यस्तु वो हृदि संशयः॥

श्रुतं भवद्भिस्तत्सर्वं किमन्यत्कथयामि वः ॥ २३७.४२॥

मुनय ऊचुः
अध्यात्मं विस्तरेणेह पुनरेव वदस्व नः ।
यदध्यात्मं यथा विद्मो भगवन्नृषिसत्तम ॥ २३७.४३॥

व्यास उवाच
अध्यात्मं यदिदं विप्राः पुरुषस्येह पठ्यते ।
युष्मभ्यं कथयिष्यामि तस्य व्याख्याऽवधार्यताम् ॥ २३७.४४॥

भीमिरापस्तथा ज्योतिर्वायुराकाशमेव च ।
महाभूतानि यश्चैव सर्वभूतेषु भूतकृत् ॥ २३७.४५॥

मुनय ऊचुः
आकारं तु भवेद्यस्य यस्मिन्देहं न पश्यति ।
आकासाद्यं शरीरेषु कथं तदुपवर्णयेत्॥

इन्द्रियाणां गुणाः केचित्कथं तानुपलक्षयेत् ॥ २३७.४६॥

व्यास उवाच
एतद्वो वर्णयिष्यामि यथावदनुदर्शनम् ।
श्रृणुध्वं तदिहैकाग्र्या यथातत्त्वं यथा च तत् ॥ २३७.४७॥

शब्दः श्रोत्रं तथा खानि त्रयमाकाशलक्षणम् ।
प्राणश्चेष्टा तथा स्पर्श एते वायुगुणास्त्रयः ॥ २३७.४८॥

रूपं चक्षुर्विपाकश्च त्रिधा ज्योतिर्विधीयते ।
रसोऽथ रसनं स्वेदो गुणास्त्वेते त्रयोऽम्भसाम् ॥ २३७.४९॥

घ्रेयं घ्राणं शरीरं च भूमेरेते गुणास्त्रयः ।
एतावानिन्द्रियग्रामो व्याख्यातः पाञ्चभौतिकः ॥ २३७.५०॥

वायोः स्पर्शो रसोऽद्भ्यश्च ज्योतिषो रूपमुच्यते ।
आकाशप्रभवः शब्दो गन्धो भूमिगुणः स्मृतः ॥ २३७.५१॥

मनो बुद्धिः स्वभावश्च गुणा एते स्वयोनिजाः ।
ते गुणानतिवर्तन्ते गुणेभ्यः परमा मताः ॥ २३७.५२॥

यथा कुर्म इवाङ्गानि प्रसार्य संनियच्छति ।
एवमेवेन्द्रियग्रामं बुद्धिश्रेष्ठो नियच्छति ॥ २३७.५३॥

यदूर्ध्वं पादतलयोरवार्केर्द्ध्वं च(गधश्च)पश्यति ।
एतस्मिन्नेव कृत्ये सा वर्तते बुद्धिरुत्तमा ॥ २३७.५४॥

गुणैस्तु नीयते बुद्धिर्बुद्धिरेवेन्द्रियाण्यपि ।

मनःषष्ठानि सर्वाणि बुद्ध्या भवात्कुतो गृणाः ॥ २३७.५५॥

इन्द्रियाणि नरैः पञ्च षष्ठं तन्मन उच्यते ।
सप्तमीं बुद्धिमेवाऽऽहुः क्षेत्रज्ञं विद्धि चाष्टमम् ॥ २३७.५६॥

चक्षुरालोकनायैव संशयं कुरुते मनः ।
बुद्धिरध्यवसानाय साक्षी क्षेत्रज्ञ उच्यते ॥ २३७.५७॥

रजस्तमश्च सत्त्वं च त्रय एते स्वयोनिजाः ।
समाः सर्वेषु भूतेषु तान्गुणानुपलक्षयेत् ॥ २३७.५८॥

तत्र यत्प्रीतिसंयुक्तं किंचिदात्मनि लक्षयेत् ।
प्रशान्तमिव संयुक्तं सत्त्वं तदुपधारयेत् ॥ २३७.५९॥

यत्तु संतापसंयुक्तं काये मनसि वा भवेत् ।
प्रवृत्तं रज इत्येवं तत्र चाप्युपलक्षयेत् ॥ २३७.६०॥

यत्तु संमोहसंयुक्तमव्यक्तं विषमं भवेत् ।
अप्रतर्क्यमविज्ञेयं तमस्तदुपदारयेत् ॥ २३७.६१॥

प्रहर्षः प्रीतिरानन्दं स्वाम्यं स्वस्थात्मचित्तता ।
अकस्माद्यदि वा कस्माद्वदन्ति सात्त्विकान्गुणान् ॥ २३७.६२॥

अभिमानो मृषावादो लोभो महोस्तथा क्षमा ।
लिङ्गानि रजसस्तानि वर्तन्ते हेतुतत्त्वतः ॥ २३७.६३॥

तथा मोहः प्रमादश्च तन्द्री निन्द्राऽप्रबोधिता ।
कथंचिदभिवर्तन्ते विज्ञेयास्तामसा गुणाः ॥ २३७.६४॥

मनः प्रसृजते भावं बुद्धिरध्यवसायिनी ।
हृदयं प्रियमेवेह त्रिविधा कर्मचोदना ॥ २३७.६५॥

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा परः स्मृतः ॥ २३७.६६॥

बुद्धिरात्मा मनुष्यस्य बुद्धिरेवाऽऽमनायिका ।
यदा विकुरुते भावं तदा भवति सा मनः ॥ २३७.६७॥

इन्द्रियाणां पृथग्भावाद्बुद्धिर्विकुरुते ह्यनु ।
क्षृण्वती भवति श्रोत्रं स्पृशती स्पर्श उच्यते ॥ २३७.६८॥

पश्यन्ति च भवेद्दृष्टी रसन्ती भवेत् ।
जिघ्रन्ती भवति घ्राणं बुद्धिर्विकुरुते पृथक् ॥ २३७.६९॥

इन्द्रियाणि तु तान्याहुस्तेषां वृत्त्या वितिष्ठति ।
तिष्ठति पुरुषे बुद्धिर्बुद्धिभावव्यवस्थिता ॥ २३७.७०॥

कदाचिल्लभते प्रीतिं कदाचिदपि शोचति ।
न सुखेन न दुःखेन कदाचिदिह मुह्यते ॥ २३७.७१॥

स्वयं भावात्मिका भावांस्त्रीनेतानतिवर्तते ।
सरितां सागरो भर्ता महावेलामिवोर्मिमान् ॥ २३७.७२॥

यदा प्रार्थयते किंचित्तदा भवति सा मनः ।
अधिष्ठाने च वै बुद्ध्या पृथगेतानि संस्मरेत् ॥ २३७.७३॥

इन्द्रियाणि च मेध्यानि विचेतव्यानि कृत्स्नशः ।
सर्वाण्येवानुपूर्वेण यद्यदा च विधीयते ॥ २३७.७४॥

अभिभागमना बुद्धिर्भावो मनसि वर्तते ।
प्रवर्तमानस्तु रजः सत्त्वमप्यतिवर्तते ॥ २३७.७५॥

ये वै भावेन वर्तन्ते सर्वेष्वेतेषु ते त्रिषु ।
अन्वर्थान्सम्प्रवर्तन्ते रथनेमिमरा इव ॥ २३७.७६॥

प्रदीपार्थं मनः कुर्यादिन्द्रियैर्बुद्धिसत्तमैः ।
निश्चरद्भिर्यथायोगमुदासीनैर्यदृच्छया ॥ २३७.७७॥

एवं स्वभावमेवेदमिति बुद्ध्वा न मुह्यति ।
अशोचन्सम्प्रहृष्यंश्च नित्य विगतमत्सरः ॥ २३७.७८॥

न ह्यात्मा शक्यते द्रष्टुमिन्द्रियैः कामगोचरैः ।
प्रवर्तमानैरनेकैर्कर्धदुरैरकृतात्मभिः ॥ २३७.७९॥

तेषां तु मनसा रश्मीन्यदा सम्यङ्नियच्छति ।
तदा प्रकाशतेऽस्याऽऽत्मा दीपदीप्ता यथाऽऽकृतिः ॥ २३७.८०॥

सर्वेषामेव भूतानां तमस्युपगते यथा ।
प्रकाशं भवते सर्वं तथैवमुपधार्यताम् ॥ २३७.८१॥

यथा वारिचरः पक्षी न लिप्यति जले चरन् ।
विमुक्तात्मा तथा योगी गुणदोषैर्न लिप्यते ॥ २३७.८२॥

एवमेव कृतप्रज्ञो न दोषैर्विषयांश्चरन् ।
असज्जमानः सर्वेषु न कथंचित्प्रलिप्यते ॥ २३७.८३॥

त्यक्त्वा पूर्वकृतं कर्मरतिर्यस्य सदाऽऽत्मनि ।
सर्वभूतात्मभूतस्य गुणसङ्गेन सज्जतः ॥ २३७.८४॥

स्वयमात्मा प्रसवति गुणेष्वपि कदाचन ।
न गुणा विदुरात्मानं गुणान्वेद स सर्वदा ॥ २३७.८५॥

परिदध्याद्गुणानां स द्रष्टा चैव यथातथम् ।
सत्त्वक्षेत्रज्ञयोरेवमन्तरं लक्षयेन्नरः ॥ २३७.८६॥

सृजते तु गुणानेक एको न सृजते गुणान् ।
पृथग्भूतौ प्रकृत्यैतौ सम्प्रयुक्तौ च सर्वदा ॥ २३७.८७॥

यथाऽश्मना हिरण्यस्य सम्प्रयुक्तौ तथैव तौ ।
मशकौदुम्बरौ वाऽपि सम्प्रयुक्तौ यथा सह ॥ २३७.८८॥

इषिका वा यथा मुञ्जे पृथक्क सह चैवाह ।
तथैव सहितावेतौ अन्योन्यस्मिन्प्रतिष्ठितौ ॥ २३७.८९॥

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे
सप्तत्रिंशदधिकद्विशततमोध्यायः ॥ २३७॥

---

अध्यायः २३८ (१३०)

गुणसर्जनकथनम्

व्यास उवाच

सृजते तु गुणान्सत्त्वे क्षेत्रज्ञस्त्वधितिष्ठति ।
गुणान्विक्रियतः सर्वानुदासीनवदीश्वरः ॥ २३८.१॥

स्वभावयुक्तं तत्सर्वं यदिमान्सृजते गुणान् ।
ऊर्णनाभिर्यथा सूत्रं सृजते तद्गुणांस्तथा ॥ २३८.२॥

प्रवृत्ता न निवर्तन्ते प्रवृत्तिर्नोपलभ्यते ।
एवमेक व्यवस्यन्ति निवृत्तिमिति चापरे ॥ २३८.३॥

उभयं सम्प्रधार्यैतदध्यवस्येद्यथामति ।

अनेनैव विधानेन भवेद्वै संशयो महान् ॥ २३८.४॥

अनादिनिधनो ह्यात्मा तं बुद्ध्वा विहरेन्नरः ।
अक्रुध्यन्नप्रहृष्यंश्च नित्यं विगतमत्सरः ॥ २३८.५॥

इत्येवं हृदये सर्वो बुद्धिचिन्तामयं दृढम् ।
अनित्यं सुखमासीनमशोच्यं छिन्नसंशयः ॥ २३८.६॥

तरयेत्प्रच्युतां पृथ्वीं यथा पूर्णां नदीं नराः ।
अवगाह्य च विद्वांसो विप्रा लोलमिमं तथा ॥ २३८.७॥

न तु तप्यति वै विद्वान्स्थले चरति तत्त्ववित् ।
एवं विचिन्त्य चाऽऽत्मानं केवलं ज्ञानमात्मनः ॥ २३८.८॥

तां(तं)तु बुद्ध्वा नरः सर्गं भूतानामागतिं गतिम् ।
समचेष्टश्च वै सम्यग्लभते शममुत्तमम् ॥ २३८.९॥

एतद्द्विजन्मसामग्र्यं ब्राह्मणस्य विशेषतः ।
आत्मज्ञानसमस्नेहपर्याप्तं तत्परायणम् ॥ २३८.१०॥

त्वं बुद्ध्वा भवेद्बुद्धः किमन्यद्बुद्धलक्षणम् ।
विज्ञायैतद्विमुच्यन्ते कृतकृत्या मनीषिणः ॥ २३८.११॥

न भवति विदुषां महद्भयं, यदविदुषां सुमहद्भयं परत्र ।
न हि गतिरधिकाऽस्ति कस्यचिद्भवति हि या विदुषः सनातनी ॥ २३८.१२॥

लोके मातरमसूयते नरस्तत्र देवमनिरीक्ष्य शोचते ।
तत्र चेत्कुशलो न शोचते, ये विदुस्तदुभयं कृताकृतम् ॥ २३८.१३॥

यत्करोत्यनभिसंधिपूर्वकं, तच्च निन्दयति यत्पुरा कृतम् ।
यत्प्रियं तदुभयं न वाऽप्रियं, तस्य तज्जनयतीह कुर्वतः ॥ २३८.१४॥

मुनय ऊचुः
यस्माद्धर्मात्परो धर्मो विद्यते नेह कश्चन ।
यो विशिष्टश्च भूतेभ्यस्तद्भवान्प्रब्रवीतु नः ॥ २३८.१५॥

व्यास उवाच
धर्मं च सम्प्रवक्ष्यामि पुराणमृषिभिः स्तुतम् ।
विशिष्टं सर्वधर्मेभ्यः श्रृणुध्वं मुनिसत्तमाः ॥ २३८.१६॥

इन्द्रियाणि प्रमाथीनि बुद्ध्या संयम्य तत्त्वतः ।

सर्वतः प्रसृतानीह पिता बालानिवाऽऽत्मजान् ॥ २३८.१७॥

मनसश्चेन्द्रियाणां चाप्यैकाग्र्यं परमं तपः ।
विज्ञेयः सर्वधर्मेभ्यः स धर्मः पर उच्यते ॥ २३८.१८॥

तानि सर्वाणि संधाय मनः षष्ठानि मेधया ।
आत्मतृप्तः स एवाऽऽसीद्बहुचिन्त्यमचिन्तयन् ॥ २३८.१९॥

गोचरेभ्यो निवृत्तानि यदा स्थास्यन्ति वेश्मनि ।
तदा चैवाऽऽत्मनाऽऽत्मानं परं द्रक्ष्यथ शाश्वतम् ॥ २३८.२०॥

सर्वात्मानं महात्मानं विधूममिव पावकम् ।
प्रपश्यन्ति महात्मानं ब्राह्मणा ये मनीषिणः ॥ २३८.२१॥

यथा पुष्पफलोपेतो बहुशाखो महाद्रुमः ।
आत्मनो नाभिजानीते क्व मे पुष्पं क्व मे फलम् ॥ २३८.२२॥

एवमात्मा न जानीते क्व गमिष्ये कुतोऽन्वहम् ।
अन्यो ह्यस्यान्तरात्माऽस्ति यः सर्वमनुपश्यति ॥ २३८.२३॥

ज्ञानदीपेन दीप्तेमन पश्यत्यात्मानमात्मना ।
दृष्ट्वाऽऽत्मानं तथा यूयं विरागा भवत द्विजाः ॥ २३८.२४॥

विमुक्ताः सर्वपापेभ्यो मुक्तत्वच इवोरगाः ।
परां बुद्धिमवाप्येहाप्यचिन्ता विगतज्वराः ॥ २३८.२५॥

सर्वतः स्रोतसं घोरां नदीं लोकप्रवाहिणीम् ।
पञ्चेन्द्रियग्राहवतीं मनःसंकल्परोधसम् ॥ २३८.२६॥

लोभमोहतृणच्छन्नां कामक्रोधसरीसृपाम् ।
सत्यतीर्थानृतक्षोभां क्रोधपङ्कां सरिद्वराम् ॥ २३८.२७॥

अव्यक्तप्रभवां शीघ्रां कामक्रोधसमाकुलाम् ।
प्रतरध्वं नदीं बुद्ध्या दुस्तरामकृतात्मभिः ॥ २३८.२८॥

संसारसागरगमां योनिपातालदुस्तराम् ।
आत्मजन्मोद्भवां तां तु जिह्वावर्तदुरासदाम् ॥ २३८.२९॥

यां तरन्ति कृतप्रज्ञा धृतिमन्तो मनीषिणः ।
तां तीर्णः सर्वतो मुक्तो विधूतात्माऽऽत्मवाञ्शुचिः ॥ २३८.३०॥

उत्तमां बुद्धिमास्थाय ब्रह्मभूयाय कल्पते ।
उत्तीर्णः सर्वसंक्लेशान्प्रसन्नात्मा विकल्मषः ॥ २३८.३१॥

भूयिष्ठानीव भूतानि सर्वस्थानान्निरीक्ष्य च ।
अक्रुध्यन्नप्रसीदंश्च ननृशंसमतिस्तथा ॥ २३८.३२॥

ततो द्रक्ष्यथ सर्वेषां भूतानां प्रभवाप्ययात् ।
एतद्धि सर्वधर्मेभ्यो विशिष्टं मेनिरे बुधाः ॥ २३८.३३॥

धर्मं धर्मभृतां श्रेष्ठा मनुयः सत्यदर्शिनः ।
आत्मानो व्यापिनो विप्रा इति पुत्रानुशासनम् ॥ २३८.३४॥

प्रयताय प्रवक्तव्यं हितायानुगताय च ।
आत्मज्ञानमिदं गुह्यं सर्वगुह्यतमं महत् ॥ २३८.३५॥

अब्रवं यदहं विप्रा आत्मसाक्षिकमञ्जसा ।
नैव स्त्री न पुमानेवं न चैवेदं नपुंसकम् ॥ २३८.३६॥

अदुः खमसुखं ब्रह्म भूतभव्यभवात्मकम् ।
यथा मतानि सर्वाणि तथैतानि यथा तथा ।
कथितानि मया विप्रा भवन्ति न भवन्ति च ॥ २३८.३७॥

यथा मतानि सर्वाणि तथैतानि यथा तथा ।
कथितानि मया विप्रा भवन्ति न भवन्ति च ॥ २३८.३८॥

तत्प्रीतियुक्तेन गुणान्वितेन, पुत्रेण सत्पुत्रदयान्वितेन ।
दृष्ट्वा हितं प्रीतमना यदर्थं, ब्रूयात्सुतस्येह यदुक्तमेतत् ॥ २३८.३९॥

मुनय ऊचुः
मोक्षः पितामहेनोक्त उपायान्नानुपायतः ।
तमुपायं यथान्यायं श्रोतुमिच्छामहे मुने ॥ २३८.४०॥

व्यास उवाच
अस्मासु तन्महाप्राज्ञा युक्तं निपुणदर्शनम् ।
यदुपायेन सर्वार्थान्मृगयध्वं सदाऽनघाः ॥ २३८.४१॥

घटोपकरणे बुद्धिर्घटोत्पत्तौ न सा मता ।
एवं धर्माद्युपायार्थं नान्यधर्मेषु कारणम् ॥ २३८.४२॥

पूर्वे समुद्रेयः पन्था न स गच्छति पश्चिमम् ।

एकः पन्था हि मोक्षस्य तच्छृणुध्वं ममानघाः ॥ २३८.४३॥

क्षमया क्रोधमुच्छिन्द्यात्कामं संकल्पवर्जनात् ।
सत्त्वसंसेवनाद्धीरो निद्रामुच्छेत्तुमर्हति ॥ २३८.४४॥

अप्रमादाद्भयं रक्षेद्रक्षेत्क्षेत्रं च संविदम् ।
इच्छां द्वेषं च कामं च धैर्येण विनिवर्तयेत् ॥ २३८.४५॥

निद्रां च प्रतिभां चैव ज्ञानाभ्यासेन तत्त्ववित् ।
उपद्रवांस्तथा योगी हितजीर्णमिताशनात् ॥ २३८.४६॥

लोभं मोहं च संतोषाद्विषयांस्तत्त्वदर्शनात् ।
अनुक्रोशादधर्मं च जयेद्धर्ममुपेक्षया ॥ २३८.४७॥

आयत्या च जयेदाशां सामर्थ्यं सङ्गवर्जनात् ।
अनित्यत्वेन च स्नेहं क्षुधां योगेन पण्डितः ॥ २३८.४८॥

कारुण्येनाऽऽत्मनाऽऽत्मानं तृष्णां च परितोषतः ।
उत्थानेन जयेत्तन्द्रां वितर्कं निश्चयाज्जयेत् ॥ २३८.४९॥

मौनेन बहुभाषां च शौर्येण च भयं जयेत् ।
यच्छेद्वाङ्मनसी बुद्ध्या तां यच्छेज्ज्ञानचक्षुषा ॥ २३८.५०॥

ज्ञानमात्मा महान्यच्छेत्तं यच्छेच्छान्तिरात्मनः ।
तदेतदुपशान्तेन बोद्धव्यं शुचिकर्मणा ॥ २३८.५१॥

योगदोषान्समुच्छिद्य पञ्च यान्कवयो विदुः ।
कामं क्रोधं च लोभं च भयं स्वप्नं च पञ्चमम् ॥ २३८.५२॥

परित्यज्य निषेवेत यथावद्योगसाधनात् ।
ध्यानमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा ॥ २३८.५३॥

शौचमाचारतः शुद्धिरिन्द्रियाणां च संयमः ।
एतैर्विवर्धते तेजः पाप्मानमुपहन्ति च ॥ २३८.५४॥

सिध्यन्ति चास्य संकल्पा विज्ञानं च प्रवर्तते ।
धूतपातः स तेजस्वी लघ्वाहारो जितेन्द्रियः ॥ २३८.५५॥

कामक्रोधौ वशे कृत्वा निर्विशेद्ब्रह्मणः पदम् ।
अमूढत्वमसङ्गित्वं कामक्रोधविवर्जनम् ॥ २३८.५६॥

अदैन्यमनुदीर्णत्वमनुद्वेगो ह्यवस्थितिः ।
एष मार्गो हि मोक्षस्य प्रसन्नो विमलः शुचिः ॥

तथा वाक्कायमनसां नियमाः कामतोऽव्ययाः ॥ २३८.५७॥

इति श्रीमहापुराणे आदिब्राह्मे सांख्ययोगनिरूपणं नाम
अष्टात्रिंशदधिकद्विशततमोऽध्यायः ॥ २३८॥

---

अध्यायः २३९ (१३१)

योगविधिनिरूपणम्

मुनय ऊचुः

सांख्यं योगस्य नो विप्र विशेषं वक्तुमर्हसि ।
तव धर्मज्ञ सर्वं हि विदितं मुनिसत्तम ॥ २३९.१॥

व्यास उवाच

सांख्यां सांख्यं प्रशंसन्ति योगान्योगविदुत्तमाः ।
वदन्ति कारणैः श्रेष्ठैः स्वपक्षोद्भवनाय वै ॥ २३९.२॥

अनीश्वरः कथं मुच्येदित्येवं मुनिसत्तमाः ।
वदन्ति कारणैः श्रेष्ठं योगं सम्यङ्मनीषिणः ॥ २३९.३॥

वदन्ति कारणं वेदं सांख्यं सम्यग्द्विजातयः ।
विज्ञायेह गतीः सर्वा विरक्तो विषयेषु यः ॥ २३९.४॥

ऊर्ध्वं स देहात्सुव्यक्तं विमुच्येदिति नान्यथा ।
एतदाहुर्महाप्राज्ञाः सांख्यं वै मोक्षदर्शनम् ॥ २३९.५॥

स्वपक्षे कारणं ग्राह्यं समर्थं वचनं हितम् ।
शिष्टानां हि मतं ग्राह्यं भवद्भिः शिष्टसंमतैः ॥ २३९.६॥

प्रत्यक्षं हेतवो योगाः सांख्याः शास्त्रविनिश्चयाः ।
उभे चैते तत्त्वे समवेते द्विजोत्तमाः ॥ २३९.७॥

उभे चैते मते ज्ञाते मुनीन्द्राः शिष्टसंमते ।
अनुष्ठिते यथाशास्त्रं नयेतां परमां गतिम् ॥ २३९.८॥

तुल्यं शौचं तयोर्युक्तं दया भूतेषु चानघाः ।
व्रतानां धारणं तुल्यं दर्शनं त्वसमं तयोः ॥ २३९.९॥

मुनय ऊचुः
यदि तुल्यं व्रतं शौचं दया चात्र महामुने ।
तुल्यं तद्दर्शनं कस्मात्तन्नौ ब्रूहि द्विजोत्तम ॥ २३९.१०॥

व्यास उवाच
रागं मोहं तथा स्नेहं कामं क्रोधं च केवलम् ।
योगास्थिरोदितान्दोषान्पञ्चैतान्प्राप्नुवन्ति तान् ॥ २३९.११॥

यथा वाऽनिमिषाः स्थूलं जालं छित्त्वा पुनर्जलम् ।
प्राप्नुयुर्विमलं मार्गं विमुक्ताः सर्वबन्धनैः ॥ २३९.१२॥

तथैव वागुरां छित्त्वा बलवन्तो यथा मृगाः ।
प्राप्नुयुर्विमलं मार्गं विमुक्ताः सर्वबन्धनैः ॥ २३९.१३॥

लोभजानि तथा विप्रा बन्धनानि बलान्विताः ।
छित्त्वा योगात्परं मार्गं गच्छन्ति विमलं शुभम् ॥ २३९.१४॥

अचलास्त्वाविला विप्रा वागुरासु तथाऽऽपरे ।
विनश्यन्ति न संदेहस्तद्वद्योगबलादृते ॥ २३९.१५॥

बलहीनाश्च विप्रेन्द्रा यथा जालं गता द्विजाः ।
बन्धं न गच्छन्त्यनघा योगास्ते तु सुदुर्लभाः ॥ २३९.१६॥

यथा च शकुनाः सूक्ष्मं प्राप्य जालमरिन्दमाः ।
तत्राशक्ता विपद्यन्ते मुच्यन्ते तु बलान्विताः ॥ २३९.१७॥

कर्मजैर्बन्धनैर्बद्धास्तद्वद्योगपरा द्विजाः ।
अबला न विमुच्यन्ते मुच्यन्ते च बलान्विताः ॥ २३९.१८॥

अल्पकश्च यथा विप्रा वह्निः शाम्यति दुर्बलः ।
आक्रान्त इन्धनैः स्थूलैस्तद्वद्योगबलः स्मृतः ॥ २३९.१९॥

स एव च तदा विप्रा वह्निर्जातबलः पुनः ।
समीरणगतः कृत्स्नां दहेत्क्षिप्रं महीमिमाम् ॥ २३९.२०॥

तत्त्वज्ञानबलो विप्रा वह्निर्जातबलः पुनः ।
समीरणगतः कृत्स्नां दहेत्क्षिप्रं महीमिमाम् ॥ २३९.२१॥

दुर्बलश्च यथा विप्राः स्रोतसा ह्रियते नरः ।
बलहीनस्तथा योगी विषयैर्ह्रियते च सः ॥ २३९.२२॥

तदेव तु यथा स्रोतसा विष्कम्भयति वारणः ।
तद्वद्योगबलं लब्ध्वा न भवेद्विषयैर्हृतः ॥ २३९.२३॥

विशन्ति वा वशाद्वाऽथ योगाद्योगबलन्विताः ।
प्रजापतीन्मनून्सर्वान्महाभूतानि चेश्वराः ॥ २३९.२४॥

न यमो नान्तकः क्रुद्धो न मृत्युर्भीमविक्रमः ।
विशन्ते तद्विजाः सर्वे योगस्यामिततेजसः ॥ २३९.२५॥

आत्मनां च सहस्राणि बहूनि द्विजसत्तमाः ।
योगं कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत् ॥ २३९.२६॥

प्राप्नुयाद्विषयान्कश्चित्पुनश्चोग्रं तपश्चरेत् ।
संक्षिप्येच्च पुनर्विप्राः सूर्यस्तेजोगुणानिव ॥ २३९.२७॥

बलस्थस्य हि योगस्य बलार्थं मुनिसत्तमाः ।
विमोक्षप्रभवं विष्णुमुपपन्नमसंशयम् ॥ २३९.२८॥

बलानि योगप्रोक्तानि मयैतानि द्विजोत्तमाः ।
निदर्शनार्थं सूक्ष्माणि वक्ष्यामि च पुनर्द्विजाः ॥ २३९.२९॥

आत्मनश्च समाधाने धारणां प्रति वा द्विजाः ।
निदर्शनानि सूक्ष्माणि सूक्ष्माणि श्रृणुध्वं मुनिसत्तमाः ॥ २३९.३०॥

अप्रमत्तो यथा धन्वी लक्ष्यं हन्ति समाहितः ।
युक्तः सम्यक्तथा योगी मोक्षं प्राप्नोत्यसंशयम् ॥ २३९.३१॥

स्नेहपात्रे यथा पूर्णे मन आधाय निश्चलम् ।
पुरुषो युक्त आरोहेत्सोपानं युक्तमानसः ॥ २३९.३२॥

मुक्तस्तथाऽयमात्मानं योगं तद्वत्सुनिश्चलम् ।
करोत्यमलामात्मानं भास्करोपमदर्शने ॥ २३९.३३॥

यथा च नावं विप्रेन्द्राः कर्णधारः समाहितः ।
महार्णवगतां शीघ्रं नयेद्विप्रांस्तु पत्तनम् ॥ २३९.३४॥

तद्वदात्मसमाधानं युक्तो योगेन योगवित् ।
दुर्गमं स्थानमाप्नोति हित्वा देहमिमं द्विजाः ॥ २३९.३५॥

सारथिश्च यथा युक्तः सदश्वान्सुसमाहितः ।
प्राप्नोत्याशु परं स्थानं लक्ष्यमुक्त इवाऽऽशुगः ॥ २३९.३६॥

तथैव च द्विजा योगी धारणासु समाहितः ।
प्राप्नोत्यशु परं स्थानं लक्ष्यमुक्त इवाऽऽशुगः ॥ २३९.३७॥

आविश्याऽऽत्मनि चाऽऽत्मानं योऽवतिष्ठति सोऽचलः ।
पाशं वहत्वे मीनानां पदमाप्नोति सोऽजरम् ॥ २३९.३८॥

नाभ्यां शीर्षे च कुक्षौ च हृदि वक्षसि पार्श्वयोः ।
दर्शने श्रवणे वाऽपि घ्राणे चामितविक्रमः ॥ २३९.३९॥

स्थानेष्वेतेषु यो योगी महाव्रतसमाहितः ।
आत्मना सूक्ष्ममात्मानं युङ्क्ते सम्यग्द्विजोत्तमाः ॥ २३९.४०॥

सुशीघ्रमचलप्रख्यं कर्म दग्ध्वा शुभाशुभम् ।
उत्तमं योगमास्थाय यदीच्छति विमुच्यते ॥ २३९.४१॥

मुनय ऊचुः
आहारान्कीदृशान्कृत्वा कानि जित्वा च सत्तम ।
योगी बलमवाप्नोति तद्भवान्वक्तुमर्हति ॥ २३९.४२॥

व्यास उवाच
कणानां भक्षणे युक्तः पिण्याकस्य च भो द्विजाः ।
स्नेहानां वर्जने युक्तो योगी बलमवाप्नुयात् ॥ २३९.४३॥

भुञ्जानो यावकं रूक्षं दीर्घकालं द्विजोत्तमाः ।
एकाहारी विशुद्धात्मा योगी बलमवाप्नुयात् ॥ २३९.४४॥

पक्षान्मासानृतूंश्चित्रान्संचरंश्च गुहास्तथा ।
अपः पीत्वा पयोमिश्रा योगी बलमावाप्नुयात् ॥ २३९.४५॥

अखण्डमपि वा मासं सततं मुनिसत्तमाः ।
उपोष्य सम्यक्शुद्धात्मा योगी बलमवाप्यनुयात् ॥ २३९.४६॥

कामं जित्वा तथा क्रोधं शीतोष्णं वर्षमेव च ।
भयं शोकं तथा स्वापं पौरुषीन्विषयांस्तथा ॥ २३९.४७॥

अरतिं दुर्जयां चैव घोरां तृष्णां च भो द्विजाः ।
स्पर्शं निद्रां तथा तन्द्रां दुर्जयां मुनिसत्तमाः ॥ २३९.४८॥

दीपयन्ति महात्मानं सूक्ष्ममात्मानमात्मना ।

वीतरागा महाप्राज्ञा ध्यानाध्ययनसम्पदा ॥ २३९.४९॥

दुर्गस्त्वेष मतः पन्था ब्राह्मणानां विपश्चिताम् ।
यः कश्चिद्व्रजति क्षिप्रं क्षेमेण मुनिपुंगवाः ॥ २३९.५०॥

यथा कश्चिद्वनं घोरं बहुसर्पसरीसृपम् ।
श्वभ्रवत्तोयहीनं च दुर्गमं बहुकण्टकम् ॥ २३९.५१॥

अभक्तमटवीप्रायं दावदग्धमहीरुहम् ।
पन्थानं तस्कराकीर्णं क्षेमेणाभिपतेत्तथा ॥ २३९.५२॥

योगमार्गं समासाद्य यः कश्चिद्व्रजते द्विजः ।
क्षेमेणोपरमेन्मार्गाद्बहुदोषोऽपि संमतः ॥ २३९.५३॥

आस्थेयं क्षुरधारासु निशितासु द्विजोत्तमाः ।
धारणा सा तु योगस्य दुर्गेयमकृतात्मभिः ॥ २३९.५४॥

विषमा धारणा विप्रा यान्ति वैन शुभां गतिम् ।
नेतृहीना यथा नावः पुरुषाणां तु वै द्विजाः ॥ २३९.५५॥

यस्तु तिष्ठति योगाधौ धारणासु यथाविधि ।
मरणं जन्मदुःखित्वं सुखित्वं स विशिष्यते ॥ २३९.५६॥

नानाशास्त्रेषु नियतं नानामुनिनिषेवितम् ।
परं योगस्य पन्थानं निश्चितं तं द्विजातिषु ॥ २३९.५७॥

परं हि तद्ब्रह्ममयं मुनीन्द्रा, ब्रह्मणमीशं वरदं च विष्णुम् ।
भवं च धर्मं च महानुभावं यद्ब्रह्मपुत्रान्सुमहानुभावान् ॥ २३९.५८॥

तमश्च कष्टं सुमहद्रजश्च, सत्त्वं च शुद्धं प्रकृतिं परां च ।
सिद्धिं च देवीं वरुणस्य पत्नीं, तेजश्च कृत्स्नं सुमहच्च धैर्यम्॥

२३९.५९ ॥

ताराधिपं खे विमलं सुतारं, विश्वांश्च देवानुरगान्पितृंश्च ।
शैलांश्च कृत्स्नानुदधींश्च वाऽचलान्नदीश्च सर्वाः सनगांश्च
नागान् ॥ २३९.६०॥

साध्यांस्तथा यक्षगणान्दिशश्च, गन्धर्वसिद्धान्पुरुषान्स्त्रियश्च ।
परस्परं प्राप्य महान्महात्मा विशेत योगी नचिराद्विमुक्तः ॥ २३९.६१॥

कथा च या विप्रवराः प्रसक्ता, दैवे महावीर्यमतौ शुभेयम् ।
योगान्स सर्वाननुभूय मर्त्या, नारायणं तं द्रुतमाप्नुवन्ति ॥ २३९.६२॥

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे योगविधिनिरूपणं नाम
एकोनचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २३९॥

---

अध्यायः २४० (१३२)

सांख्यविधिनिरूपणम्

मुनय ऊचुः
सम्यक्क्रियेयं विप्रेन्द्र वर्णिता शिष्टसंमता ।
योगमार्गो यथान्यायं शिष्यायेह हितषिणा ॥ २४०.१॥

सांख्ये त्विदानीं धर्मस्य विधिं प्रब्रूहि तत्त्वतः ।
त्रिषु लोकेषु यज्ज्ञानं सर्वं तद्विदितं हि ते ॥ २४०.२॥

व्यास उवाच
श्रृणुध्वं मुनयः सर्वमाख्यानं विदितात्मनाम् ।
विहितं यतिभिर्वृद्धैः कपिलादिभिरीश्वरैः ॥ २४०.३॥

यस्मिन्सुविभ्रामाः केचिद्दृश्यन्ते मुनिसत्तमाः ।
गुणाश्च यस्मिन्बहवो दोषहानिश्च केवला ॥ २४०.४॥

ज्ञानेन परिसंख्याय सदोषान्विषयान्द्विजाः ।
मानुषान्दुर्जयान्कृत्स्नान्पैशाचान्विषयांस्तथा ॥ २४०.५॥

विषयानौरगाञ्ज्ञात्वा गन्धर्वविषयांस्तथा ।
पितॄणां विषयाञ्ज्ञात्वा तिर्यक्त्वं चरतां द्विजाः ॥ २४०.६॥

सुपर्णविषयाञ्ज्ञात्वा मरुतां विषयांस्तथा ।
महर्षिविषयांश्चैव राजर्षिविषयांस्तथा ॥ २४०.७॥

आसुरान्विषयाञ्ज्ञात्वा वैश्वदेवांस्तथैव च ।
देवर्षिविषयाञ्ज्ञात्वा योगानामपि वै परान् ॥। २४०.८॥

विषयांश्च प्रमाणस्य ब्रह्मणो विषयांतथा ।
आयुषश्च परं कालं लोकैर्विज्ञाय तत्त्वतः ॥ २४०.९॥

सुखस्य च परं कालं विज्ञाय मुनिसत्तमाः ।

प्राप्तकाले च यद्दुःखं पततां विषयैषिणाम् ॥ २४०.१०॥

तिर्यक्त्वे पततां विप्रास्तथैव नरकेषु यत् ।
स्वर्गस्य च गुणाञ्ज्ञात्वा दोषान्सर्वांश्च भो द्विजाः ॥ २४०.११॥

वेदवादे च ये दोषा गुणा ये चापि वैदिकाः ।
ज्ञानयोगे च ये दोषा ज्ञानयोगे च ये गुणाः ॥ २४०.१२॥

सांख्यज्ञाने च ये दोषांस्तथैव च गुणां तथा ।
षड्गुणं च नभो ज्ञात्वा तमश्च त्रिगुणं महत् ॥ २४०.१३॥

तमश्चाष्टगुणं ज्ञात्वा बुद्धिं सप्तगुणां तथा ।
षड्गुणं च नभो ज्ञात्वा तपश्च त्रिगुणं महत् ॥ २४०.१४॥

द्विगुणं च रजो ज्ञात्वा सत्त्वं चैकगुणं पुनः ।
मार्गं विज्ञाय तत्त्वेन प्रलयप्रेक्षणेन तु ॥ २४०.१५॥

ज्ञानविज्ञानसम्पन्नाः कारणैर्भावितात्मभिः ।
प्राप्नुवन्ति शुभं मोक्षं सूक्ष्मा इव नभः परम् ॥ २४०.१६॥

रूपेण दृष्टिं संयुक्तां घ्राणं गन्धगुणेन च ।
शब्दग्राह्यं तथा श्रोत्रं जिह्वां रसगुणेन च ॥ २४०.१७॥

त्वचं स्पर्शं तथा शक्यं वायुं चैव तदाश्रितम् ।
मोहं तमसि संयुक्तं लोभं मोहेषु संश्रिताः ॥ २४०.१८॥

विष्णुं क्रान्ते बले शक्रं कोष्ठे सक्तं तथाऽनलम् ।
अप्सु देवीं समायुक्तामापस्तेजसि संश्रिताः ॥ २४०.१९॥

तेजो वायौ तु संयुक्तं वायुं नभसि चाऽऽश्रितम् ।
नभो महति संयुक्तं तमो महसि संस्थितम् ॥ २४०.२०॥

रजः सत्त्वं तथा सक्तं सत्त्वं सक्तं तथाऽऽत्मनि ।
सक्तमात्मानमीशे च देवे नारायणे तथा ॥ २४०.२१॥

देवं मोक्षे च संयुक्तं ततो मोक्षं च न क्वचित् ।
ज्ञात्वा सत्त्वगुणं देहं वृतं षोडशभिर्गुणैः ॥ २४०.२२॥

स्वभावं भावनां चैव ज्ञात्वा देहसमाश्रिताम् ।
मध्यस्थमिव चाऽऽत्मानं पापं यस्मिन्न विद्यत ॥ २४०.२३॥

द्वितीयं कर्म वै ज्ञात्वा विप्रेन्द्रा विष्यैषिणाम् ।
इन्द्रियाणीन्द्रियार्थांश्च सर्वानात्मनि संश्रितान् ॥ २४०.२४॥

दुर्लभत्वं च मोक्षस्य विज्ञाय श्रुतिपूर्वकम् ।
प्राणापानौ समानं च व्यानोदानौ च तत्त्वतः ॥ २४०.२५॥

आद्यं चैवानिलं ज्ञात्वा प्रभवं चानिलं पुनः ।
सप्तधा तांस्तथा शेषासप्तधा विधिवत्पुनः ॥ २४०.२६॥

प्रजापतीनृषींश्चैव सर्गांश्च सुबहून्वरान् ।
सप्तर्षींश्च बहूञ्ज्ञात्वा राजर्षींश्च परंतपान् ॥ २४०.२७॥

सुरर्षीन्मरुतश्चान्यान्ब्रह्मर्षीन्सूर्यसंनिभान् ।
ऐश्वर्याच्च्यावितान्दृष्ट्वा कालेन महता द्विजाः ॥ २४०.२८॥

महतां भूतसंघानां श्रुत्वा नाशं च भो द्विजाः ।
गतिं वाचां शुभां ज्ञात्वा अर्चार्हाः पापकर्मणाम् ॥ २४०.२९॥

वैतरण्यां च यद्दुःखं पतितानां यमक्षये ।
योनिषु च विचित्रासु संचारानशुभांस्तथा ॥ २४०.३०॥

जठरे चाशुभे वासं शोणितोदकभाजने ।
श्लेष्ममूत्रपुरीषे च तीव्रगन्धसमन्विते ॥ २४०.३१॥

शुक्रशोणितसंघाते मज्जास्नायुपरिग्रहे ।
शिरशतसमाकीर्णे नवद्वारे पुरेऽथ वै ॥ २४०.३२॥

विज्ञाय हितमात्मानं योगांश्च विविधान्द्विजाः ।
तामसानां च जन्तूनां रमणीयानृतात्मनाम् ॥ २४०.३३॥

सात्त्विकानां च जन्तूनां कुत्सितं मुनिसत्तमाः ।
गर्हितं महातामर्थे सांख्यानां विदितात्मनाम् ॥ २४०.३४॥

उपप्लवांस्तथा घोराञ्शशिनस्तेजस्तथा ।
ताराणां पतनं दृष्ट्वा नक्षत्राणां च पर्ययम् ॥ २४०.३५॥

द्वंद्वानां विप्रयोगं च विज्ञाय कृपणं द्विजाः ।
अन्योन्यभक्षणं दृष्ट्वा भूतानामपि चाशुभम् ॥ २४०.३६॥

बाल्ये मोहं च विज्ञाय पक्षदेहस्य चाशुभम् ।
रागं मोहं च सम्प्राप्तं क्वचित्सत्त्वं समाश्रितम् ॥ २४०.३७॥

सहस्रेषु नरः कश्चिन्मोक्षबुद्धिं समाश्रितः ।
दुर्लभत्वं च मोक्षस्य विज्ञानं श्रुतिपूर्वकम् ॥ २४०.३८॥

बहुमानमलब्धेषु लब्धे मध्यस्थतां पुनः ।
विषयाणां च दौरात्म्यं विज्ञाय च पुनर्द्विजाः ॥ २४०.३९॥

गतासूनां च सत्त्वानां देहान्भित्त्वा तथा शुभान् ।
वासं कुलेषु जन्तूनां मरणाय धृतात्मनाम् ॥ २४०.४०॥

सात्त्विकानां च जन्तूनां दुःखं विज्ञाय भो द्विजाः ।
ब्रह्मघ्नानां गतिं ज्ञात्वा पतितानां सुदारुणाम् ॥ २४०.४१॥

सुरापाने च सक्तानां ब्राह्मणानां दुरात्मनाम् ।
गुरुदारप्रसक्तानां गतिं विज्ञाय चाशुभाम् ॥ २४०.४२॥

जननीषु च वर्तन्ते येन सम्यग्द्विजोत्तमाः ।
सदेवकेषु लोकेषु येन वर्तन्ति मानवाः ॥ २४०.४३॥

तेन ज्ञानेन विज्ञाय गतिं चाशुभकर्मणाम् ।
तिर्यग्योनिगतानां च विज्ञाय च गतीः पृथक् ॥ २४०.४४॥

वेदवादांस्तथा चित्रानृतूनां पर्ययांस्तथा ।
क्षयं संवत्सराणां च मासानां च क्षयं तथा ॥ २४०.४५॥

पक्षक्षयं तथा दृष्ट्वा दिवसानां च संक्षयम् ।
क्षय संवत्सराणां च मासानां च क्षयं तथा ॥ २४०.४६॥

वृद्धिं दृष्ट्वा समुद्राणां क्षयं तेषां तथा पुनः ।
क्षयं धनानां दृष्ट्वा च पुनर्वृद्धिं तथैव च ॥ २४०.४७॥

संयोगानां तथा दृष्ट्वा युगानां च विशेषतः ।
देहवैक्लव्यतां चैव सम्यग्विज्ञाय तत्त्वतः ॥ २४०.४८॥

आत्मदोषांश्च विज्ञाय सर्वानात्मनि संस्थितान् ।
स्वदेहादुत्थितान्गन्धांस्तथा विज्ञाय चाशुभाम् ॥ २४०.४९॥

मुनय ऊचुः
कानुत्पातभवान्दोषान्पश्यति ब्रह्मवित्तम ।
एतं नः संशयं कृत्स्नं वक्तुमर्हस्यशेषतः ॥ २४०.५०॥

व्यास उवाच
पञ्च दोषान्द्विजा देहे प्रवदन्ति मनीषिणः ।
मार्गज्ञाः कापिलाः सांख्याः शृणुध्वं मुनिसत्तमाः ॥ २४०.५१॥

कामक्रोधौ भयं निद्रा पञ्चमः श्वास उच्यते ।
एते दोषाः शरीरेषु दृश्यन्ते सर्वदेहिनाम् ॥ २४०.५२॥

छिन्दन्ति क्षमया क्रोधं कामं संकल्पवर्जनात् ।
सत्त्वसंसेवनान्निद्रामप्रमादाद्भयं तथा ॥ २४०.५३॥

छिन्दन्ति पञ्चमं श्वासमल्पाहारतया द्विजाः ।
गुणान्गुणशतैर्ज्ञात्वा दोषान्दोषशतैरपि ॥ २४०.५४॥

हेतून्हेतुशतैश्चित्रैश्चित्रान्विज्ञाय तत्त्वतः ।
अपां फेनोपमं लोकं विष्णोर्मायाशतैः कृतम् ॥ २४०.५५॥

चित्रभित्तिप्रतीकाशं नलसारमनर्थकम् ।
तमः संभ्रमितं दृष्ट्वा वर्षबुद्बुदसंनिभम् ॥ २४०.५६॥

नाशप्रायं सुखाधानं नाशोत्तरमहाभयम् ।
रजस्तमसि संमग्नं पङ्के द्विपमिवावशम् ॥ २४०.५७॥

सांख्या विप्रा महाप्राज्ञास्त्यक्त्वा स्नेहं प्रजाकृतम् ।
ज्ञानज्ञेयेन सांख्येन व्यापिना महता द्विजाः ॥ २४०.५८॥

राजसानशुभान्गन्धांस्तामसांश्च तथाविधान् ।
पुण्यांश्च सात्त्विकान्गन्धान्स्पर्शजान्देहसंश्रितान् ॥ २४०.५९॥

छित्त्वाऽऽमज्ञानशस्त्रेण तपोदण्डेन सत्तमाः ।
ततो दुःखादिकं घोरं चिन्ताशोकमहाह्रदम् ॥ २४०.६०॥

व्याधिमृत्युमहाघोरं महाभयमहोरगम् ।
ततः कूर्मं रजोमीनं प्रज्ञया संतरन्त्युत ॥ २४०.६१॥

स्नेहपङ्कं जरादुर्गं स्पर्शद्वीपं द्विजोत्तमाः ।
कर्मागाधं सत्यतीरं स्थितं व्रतमनीषिणः ॥ २४०.६२॥

हर्षसंघमहावेगं नानारससमाकुलम् ।
नानाप्रीतिमहारत्नं दुःखज्वरसमीरितम् ॥ २४०.६३॥

शोकतृष्णामहावर्तं तीक्ष्णव्याधिमहारुजम् ।

अस्थिसंघातसंघट्टं श्लेष्मयोगं द्विजोत्तमाः ॥ २४०.६४॥

दानमुक्ताकरं घोरं शोणितोद्गारविद्रुमम् ।
हसितोत्क्रुष्टनिर्घोषं नानाज्ञासुदुष्करम् ॥ २४०.६५॥

रोदनाश्रुमलक्षारं सङ्गयोगपरायणम् ।
प्रलब्ध्वा जन्मलोको यं पुत्रबान्धवपत्तनम् ॥ २४०.६६॥

अहिंसासत्यमर्यादं प्राणयोगमयोर्मिलम् ।
वृन्दानुगामिनं क्षीरं सर्वभूतपयोदधिम् ॥ २४०.६७॥

मोक्षदुर्लभविषयं वाडवासुखसागरम् ।
तरन्ति यतयः सिद्धा ज्ञानयोगेन चानघाः ॥ २४०.६८॥

तीर्त्वा च दुस्तरं जन्म विशन्ति विमलं नभः ।
ततस्तान्सुकृतीञ्ज्ञात्वा सूर्यो वहतिरश्मिभिः ॥ २४०.६९॥

पद्मतन्तुवदाविश्य प्रवहन्विषयान्द्विजाः ।
तत्र तान्प्रवहो वायुः प्रतिगृह्णाति चानघाः ॥ २४०.७०॥

वीतरागान्यतीन्सिद्धान्वीर्ययुक्तांस्तपोधनान् ।
सूक्ष्मः शीतः सुगन्धश्च सुखस्पर्शश्च भो द्विजाः ॥ २४०.७१॥

सप्तानां मरुतां श्रेष्ठो लोकान्गच्छति यः शुभान् ।
स तान्वहति विप्रेन्द्रा नभसः परमां गतिम् ॥ २४०.७२॥

नभो वहति लोकेशात्रजसः परमां गतिम् ।
रजो वहति विप्रेन्द्राः सत्त्वस्य परमांगतिम् ॥ २४०.७३॥

सत्त्वं वहति शुद्धात्मा परं नारायणं प्रभुम् ।
प्रभुर्वहति शुद्धात्मा परमात्मानमात्मना ॥ २४०.७४॥

परमात्मानमासाद्य तद्भूता यतयोऽमलाः ।
अमृतत्वाय कल्पन्ते न निवर्तन्ति च द्विजाः ॥ २४०.७५॥

परमा सा गतिर्विप्रा निर्द्वन्द्वानां महात्मनाम् ।
सत्यार्जवरतानां वै सर्वभूतदयावताम् ॥ २४०.७६॥

मुनय ऊचुः
स्थानमुत्तममासाद्य भगवन्तं स्थिरव्रताः ।
आजन्ममरणं वा ते रमन्ते तत्र वा न वा ॥ २४०.७७॥

यदत्र तथ्यं तत्त्वं नो यथावद्वक्तुमर्हसि ।
त्वदृते मानवं नान्यं प्रष्टुमर्हाम सत्तम ॥ २४०.७८॥

मोक्षदोषो महानेष प्राप्य सिद्धिं गतानृषीन् ।
यदि तत्रैव विज्ञाने वर्तन्ते यतयः परे ॥ २४०.७९॥

प्रवृत्तिलक्षणं धर्मं पश्याम परमं द्विज ।
मग्नस्य हि परे ज्ञाने किंतु दुःखान्तरं भवेत् ॥ २४०.८०॥

व्यास उवाच
यथानायायं मुनिश्रेष्ठाः प्रश्नः पृष्टश्च संकटः ।
बुधानामपि संमोहः प्रश्नेऽस्मिन्मुनिसत्तमाः ॥ २४०.८१॥

अत्रापि तत्त्वं परमं शृणुध्वं वचनं मम ।
बुद्धिश्च परमा यत्र कपिलानां महात्मनाम् ॥ २४०.८२॥

इन्द्रियाण्यपि बुध्यन्ते स्वदेहं देहिनां द्विजाः ।
करणान्यात्मनस्तानि सूक्ष्मं पश्यन्ति तैस्तु सः ॥ २४०.८३॥

आत्मना विप्रहीणानि काष्ठकुड्यसमानि तु ।
विनश्यन्ति न संदेहो वेला इव महार्णवे ॥ २४०.८४॥

इन्द्रियैः सह सुप्तस्य देहिनो द्विजसत्तमाः ।
सूक्ष्मश्चरति सर्वत्र नभसीव समीरणः ॥ २४०.८५॥

स पश्यति यथान्यायं स्मृत्वा स्पृशति चानघाः ।
बुध्यमानो यथापूर्वमखिलेनेह भो द्विजाः ॥ २४०.८६॥

इन्द्रियाणि ह सर्वाणि स्वे स्वे स्थाने यथाविधि ।
अनीशत्वात्प्रलीयन्ते सर्पा विषहता इव ॥ २४०.८७॥

इन्द्रियाणि ह सर्वाणि स्वस्थानेष्वेव सर्वशः ।
आक्रम्य गतयः सूक्ष्माव(श्च)रत्यात्मा न संशयः ॥ २४०.८८॥

सत्त्वस्य च गुणान्कृत्स्नान्रजसश्च गुणान्पुनः ।
गुणांश्च तमसः सर्वान्गुणान्बुद्धेश्च सत्तमाः ॥ २४०.८९॥

गुणांश्च मनसश्चापि नभसश्च गुणांस्तथा ।
गुणान्वायोश्च सर्वज्ञाः स्नेहजांश्च गुणान्पुनः ॥ २४०.९०॥

अपां गुणास्तथा विप्राः पार्थिवांश्च गुणानपि ।
सर्वानेव गुणैर्व्याप्य क्षेत्रज्ञेषु द्विजोत्तमाः ॥ २४०.९१॥

आत्मा चरति क्षेत्रज्ञः कर्मणा च शुभाशुभे ।
शिष्या इवमहात्मानमिन्द्रियाणि च तं द्विजाः ॥ २४०.९२॥

प्रकृतिं चाप्यतिक्रम्य सुद्धं सूक्ष्मं परात्परम् ।
नारायणं महात्मानं निर्विकारं परात्परम् ॥ २४०.९३॥

विमुक्तं सर्वपापेक्ष्यः प्रविष्टं च ह्यनामयम् ।
परमात्मानमगुणं निर्वृतं तं च सप्तमाः ॥ २४०.९४॥

श्रेष्ठं तत्र मनो विप्रा इन्द्रियाणि च भोः द्विजाः ।
आगच्छन्ति यथाकालं गुरोः संदेशकारिणः ॥ २४०.९५॥

शक्यं वाऽल्पेन कालेन शान्तिं प्राप्तुं गुणांस्तथा ।
एवमुक्तेन विप्रेन्द्राः सांख्य योगेन मोक्षिणीम् ॥ २४०.९६॥

सांख्या विप्रा महाप्राज्ञा गच्छन्ति परमां गतिम् ।
ज्ञानेनानेन विप्रेन्द्रास्तुल्यं ज्ञानं न विद्यते ॥ २४०.९७॥

अत्र वः संशयो मा भूज्ज्ञानं सांख्यं परं मतम् ।
अक्षरं ध्रुवमेवोक्तं पूर्वं ब्रह्म सनातनम् ॥ २४०.९८॥

अनादिमध्यनिधनं निर्द्वंद्वं कर्तृ शाश्वतम् ।
कूटस्थं चैव नित्यं च यद्वदन्ति शमात्मकाः ॥ २४०.९९॥

यतः सर्वाः प्रवर्तन्ते सर्गप्रलयविक्रियाः ।
एवं शंसन्ति शास्त्रेषु प्रवक्तारो महर्षयः ॥ २४०.१००॥

सर्वे विप्राश्च वेदाश्च तथा सामविदो जनाः ।
ब्रह्मण्यं परमं देवमनन्तं परमाच्युतम् ॥ २४०.१०१॥

प्रर्थयन्तश्च तं विप्रा वदन्ति गुणबुद्धयः ।
सम्यगुक्तास्तथा योगाः सांख्याश्चामितदर्शनाः ॥ २४०.१०२॥

अमूर्तिस्तस्य विप्रेन्द्राः सांख्यं मूर्तिरिति श्रुतिः ।
अभिज्ञानानि तस्याऽऽहुर्महान्ति मुनिसत्तमाः ॥ २४०.१०३॥

द्विविधानि हि भूतानि पृथिव्यां द्विजसत्तमाः ।
अगम्यगम्यसंज्ञानि गम्यं तत्र विशिष्यते ॥ २४०.१०४॥

ज्ञानं महद्वै महतश्च विप्रा, वेदेषु सांख्येषु तथैव योगे ।
यच्चापि दृष्टं विधिवत्पुराणे, सांख्यागतं तन्निखिलं मुनीन्द्राः ॥ २४०.१०५॥

यच्चेतिहासेषु महत्सु दृष्टं, यथार्थशास्त्रेषु विशिष्टदृष्टम् ।
ज्ञानं च लोके यदिहास्ति किंचित्सांख्यागतं तच्च महामुनीन्द्राः ॥ २४०.१०६॥

समस्तदृष्टं परमं बलं च, ज्ञानं च मोक्षश्च यथावदुक्तम् ।
तपांसि सूक्ष्माणि च यानि चैव, सांख्यं यथावद्विहितानि विप्राः ॥ २४०.१०७॥

विपर्ययं तस्य हितं सदैव, गच्छन्ति सांख्याः सततं सुखेन ।
तांश्चापि संधार्य ततः कृतार्थाः, पतन्ति विप्रायतनेषु भूयः ॥ २४०.१०८॥

हित्वा च देहं प्रविशन्ति मोक्षं दिवौकसश्चापि च योगसांख्याः ।
अतोऽधिकं तेऽभिरता महार्हे, साख्ये द्विजा भो इह शिष्टजुष्टे ॥ २४०.१०९॥

तेषां तु तिर्यग्गमनं हि दृष्टं, नाधो गतिः पापकृतां निवासः ।
न वा प्रधाना अपि ते द्विजातयो, ये ज्ञानमेतन्मुनयो न सक्ताः ॥ २४०.११०॥

सांख्यां विशालं परमं पुराणं, महार्णवं विमलमुदारकान्तम् ।
कृत्स्नं हि सांख्या मुनया महात्मनारायणे धारयथाप्रमेयम् ॥ २४०.१११॥

एतन्मयोक्तं परमं हि तत्त्वं, नारायणाद्विश्वमिदं पुराणम् ।
स सर्गकाले च करोति सर्गं, संहारकाले च हरेत भूयः ॥ २४०.११२॥

इति श्रीमहापुराणे आदिब्राह्मे व्यासऋषिसंवादे सांख्यविधिनिरूपणं
नामैकोनचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४०॥

---

अध्यायः २४१ (१३३)

वसिष्ठकरालजनकसंवादे क्षराक्षरविचारनिरूपणम्

मुनय ऊचुः

किं तदक्षरमित्युक्तं यस्मान्नाऽऽवर्तते पुनः ।
किंस्वित्तत्क्षरमित्युक्तं यस्मादावर्तते पुनः ॥ २४१.१॥

अक्षराक्षरयोर्व्यक्तिं पृच्छामस्त्वां महामुने ।
उपलब्धुं मुनिश्रेष्ठ तत्त्वेन मुनिपुंगव ॥ २४१.२॥

त्वं हि ज्ञानविदां श्रेष्ठः प्रोच्यसे वेदपारगैः ।

ऋषिभिश्च महाभागैर्यतिभिश्च महात्मभिः ॥ २४१.३॥

तदेतच्छ्रोतुमिच्छास्त्वत्तः सर्वं महामते ।
न तृप्तिमधिगच्छामः श्रृण्वन्तोऽमृतमुत्तमम् ॥ २४१.४॥

व्यास उवाच
अत्र वो वर्णयिष्यामि इतिहासं पुरातनम् ।
वसिष्ठस्य च संवादं करालजनकस्य च ॥ २४१.५॥

वसिष्ठं श्रेष्ठमासीनमृषीणां भास्करद्युतिम् ।
पप्रच्छ जनको राजा ज्ञानं नैःश्रेयसं परम् ॥ २४१.६॥

परमात्मनि कुशलमध्यात्मगतिनिश्चयम् ।
मैत्रावरुणमिमासीनमभिवाद्य कृताञ्जलिः ॥ २४१.७॥

स्वच्छन्दं सुकृतं चैव मधुरं चाप्यनुल्बणम् ।
पप्रच्छर्षिवरं राजा करालजनकः पुरा ॥ २४१.८॥

करालजनक उवाच
भगवञ्श्रोतुमिच्छामि परं ब्रह्म सनातनम् ।
यस्मिन्न पुनरावृत्तिं प्राप्नुवन्ति मनीषिणः ॥ २४१.९॥

यच्च तत्क्षरमित्युक्तं यत्रेदं क्षरते जगत् ।
यच्चाक्षरमिति प्रोक्तं शिवं क्षेममनामयम् ॥ २४१.१०॥

वसिष्ठ उवाच
श्रूयतां पृथिवीपाल क्षरतीदं यथा जगत् ।
यत्र क्षरति पूर्वेण यावत्कालेन चाप्यथ ॥ २४१.११॥

युगं द्वादशसाहस्रं कल्पं विद्धि चतुर्युगम् ।
दशकल्पशतावर्तमहस्तद्ब्राह्ममुच्यते ॥ २४१.१२॥

रात्रिश्चैतावती राजन्यस्यन्ते प्रतिबुध्यते ।
सृजत्यनन्तकर्माणि महान्तं भूतमग्रजम् ॥ २४१.१३॥

मूर्तिमन्तममूर्तात्मा विश्वं शंभुः स्वयंभुवः ।
यत्रोत्पत्तिं प्रवक्ष्यामि मूलतो नृपसत्तम ॥ २४१.१४॥

अणिमा लघिमा प्राप्तिरीशानं ज्योतिरव्ययम् ।
सर्वतःपाणिपादान्तं सर्वतोऽक्षिशिरोमुखम् ॥ २४१.१५॥

सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ।
हिरण्यगर्भो भगवानेष बुद्धिरिति स्मृतिः ॥ २४१.१६॥

महानिति च योगेषु विरिञ्चिरिति चाप्यथ ।
सांख्ये च पठ्यते शास्त्रे नामभिर्बहुधात्मकः ॥ २४१.१७॥

विचित्ररूपो विश्वात्मा एकाक्षर इति श्रुतः ।
धृतमेकात्मकं येन कृत्स्नं त्रैलोक्यमात्मना ॥ २४१.१८॥

तथैव बहुरूपत्वाद्विश्वरूप इति श्रुतः ।
एष वै विक्रियापन्नः सृजत्यात्मानमात्मना ॥ २४१.१९॥

प्रधानं तस्य संयोगादुत्पन्नं सुमहत्पुरम् ।
अहंकारं महातेजाः प्रजापतिनमस्कृतम् ॥ २४१.२०॥

अव्यक्ताद्व्यक्तिमापन्नं विद्यासर्गं वदन्ति तम् ।
महान्तं चाप्यहंकारमविद्यासर्गं एव च ॥ २४१.२१॥

अचरश्च चरश्चैव समुत्पन्नौ तथैकतः ।
विद्याऽविद्येति विख्याते श्रुतिशास्त्रानुचिन्तकैः ॥ २४१.२२॥

भूतसर्गमहंकारात्तृतीयं विद्धि पार्थिव ।
अहंकारेषु नृपते चतुर्थं विद्धि वैकृतम् ॥ २४१.२३॥

वायुर्ज्योतिरथाऽऽकाशमापोऽथ पृथिवी तथा ।
शब्दस्पर्शौ च रूपं च रसो गन्धस्तथैव च ॥ २४१.२४॥

एवं युगपदुत्पन्नं दशवर्गमसंशयम् ।
पञ्चमं विद्धि राजेन्द्र भौतिकं सर्गमर्थकृत् ॥ २४१.२५॥

श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणमेव च पञ्चमम् ।
वाघस्तौ चैव पादौ च पायुर्मेढ्रं तथैव च ॥ २४१.२६॥

बुद्धीन्द्रियाणि चैतानि तथा कर्मेन्द्रियाणि च ।
संभूतानीह युगपन्मनसा सह पार्थिव ॥ २४१.२७॥

एषा तत्त्वचतुर्विंशा सर्वाऽऽकृतिः प्रवर्तते ।
यां ज्ञात्वा नाभिशोचन्ति ब्राह्मणास्तत्त्वदर्शिनः ॥ २४१.२८॥

एवमेतत्समुत्पन्नं त्रैलोक्यमिदमुत्तमम् ।
वेदितव्यं नरश्रेष्ठ सदैव नरकार्णवे ॥ २४१.२९॥

सयक्षभूतगन्धर्वे सकिंनरमहोरगे ।
सचारणपिशाचे वै सदेवर्षिनिशाचरे ॥ २४१.३०॥

सदंशकीटमशके सपूतिकृमिमूषके ।
शुनि श्वपाके चैणेये सचाण्डाले सपुल्कसे ॥ २४१.३१॥

हस्त्यश्वखरशार्दूले सवृके गवि चैव ह ।
या च मूर्तिश्च यत्किंचित्सर्वत्रैतन्निदर्शनम् ॥ २४१.३२॥

जले भुवि तथाऽऽकाशे नान्यत्रेति विनिश्चयः ।
स्थानं देहवतामासीदित्येवनुशुश्रुम ॥ २४१.३३॥

कृत्स्नमेतावतस्तात क्षरते व्यक्तसंज्ञकः ।
अहन्यहनि भूतात्मा यच्चाक्षर इति स्मृतम् ॥ २४१.३४॥

ततस्तत्क्षरमित्युक्तं क्षरतीदं यथा जगत् ।
जगन्मोहात्मकं चाऽऽहुरव्यक्ताद्व्यक्तसंज्ञकम् ॥ २४१.३५॥

महांश्चैवाक्षरो नित्यमेतत्क्षरविवर्जनम् ।
कथितं ते महाराज यस्मान्नाऽऽवर्तते पुनः ॥ २४१.३६॥

पञ्चविंशतिकोऽमूर्तः स नित्यस्तत्त्वसंज्ञकः ।
सत्त्वसंश्रयणात्तत्वं सत्त्वमाहुर्मनीषिणः ॥ २४१.३७॥

यदमूर्तिः सृजद्व्यक्तं तन्मूर्तिमधितिष्ठति ।
चतुर्विंशतिमो व्यक्तो ह्यमूर्तिः पञ्चविंशकः ॥ २४१.३८॥

स एव हृदि सर्वासु मूर्तिष्वातिष्ठताऽऽत्मवान् ।
चेतयंश्चेतनीं नित्यं सर्वमूर्तिरमूर्तिमान् ॥ २४१.३९॥

सर्गप्रलयधर्मेण स सर्गप्रलयात्मकः ।
गोचरे वर्तते नित्यं निर्गुणो गुणसंज्ञितः ॥ २४१.४०॥

एवमेष महात्मा च सर्गप्रलयकोटिशः ।
विकुर्वाणः प्रकृतिमान्नाभिमन्येत बुद्धिमान् ॥ २४१.४१॥

तमःसत्त्वरजोयुक्तस्तासु तास्विह योनिषु ।
लीयते प्रतिबुद्धत्वादबुद्धजनसेवनात् ॥ २४१.४२॥

सहवासनिवासत्वाद्बालोऽहमिति मन्यते ।

योऽहं न सोऽहमित्युक्ते गुणानेवानुवर्तते ॥ २४१.४३॥

तमसा तामसान्भावन्विविधान्प्रतिपद्यते ।
रजसा राजसांश्चैव सात्त्विकान्सत्त्वसंक्षयात् ॥ २४१.४४॥

शुक्ललोहितकृष्णानि रूपाण्येतानि त्रीणि तु ।
सर्वाण्येतानि रूपाणि जानीहि प्राकृतानि तु ॥ २४१.४५ ।
तामसा निरयं यान्ति राजसा मानुषानथ ।
सात्त्विका देवलोकाय गच्छन्ति सुखभागिनः ॥ २४१.४६॥

निष्केवलेन पापेन तिर्यग्योनिमवाप्नुयात् ।
पुण्यपापेषु मानुष्यं पुण्यमात्रेण देवताः ॥ २४१.४७॥

एवमव्यक्तविषयं मोक्षमाहुर्मनीषिणः ।
पञ्चविंशतिमो योऽयं ज्ञानादेव प्रवर्तते ॥ २४१.४८॥

इति श्रीमहापुराणे आदिब्राह्मे वसिष्ठकरालजनकसंवादे
क्षराक्षरविचारनिरूपणं नाम एकचत्वारिंशदधिकद्विशततमोऽध्यायः॥

२४१ ॥

---

अध्यायः २४२ (१३४)

वशिष्ठकरालजनकसंवादवर्णनम्

वसिष्ठ उवाच

एवमप्रतिबुद्धत्वादबुद्धमनुवर्तते ।
देहाद्देहसहस्राणि तथा च न स भिद्यते ॥ २४२.१॥

तिर्यग्योनिसहस्त्रेषु कदाचिद्देवतास्वपि ।
उत्पद्यति तपोयोगाद्गुणैः सह गुणक्षयात् ॥ २४२.२॥

मनुष्यत्वाद्दिवं याति देवो मानुष्यमेति च ।
मानुष्यान्निरयस्थानमालयं प्रतिपद्यते ॥ २४२.३॥

कोषकारो यथाऽऽत्मानं कीटः समभिरुन्धति ।
सूत्रतन्तुगुणैर्नित्यं तथाऽयमगुणो गुणैः ॥ २४२.४॥

द्वंद्वंमेति च निर्द्वंद्वस्तासु तास्विह योनिषु ।
शीर्षरोगेऽक्षिरोगे च दन्तशूले गलग्रहे ॥ २४२.५॥

जलोदरेऽतिसारे च गण्डमालविचर्चिके ।
श्वत्रकुष्ठेऽग्निदग्धे च सिध्मापस्मारयोरपि ॥ २४२.६॥

यानि चान्यानि द्वंद्वानि प्राकृतानि शरीरिणाम् ।
उत्पद्यन्ते विचित्राणि तान्येवाऽऽत्माऽभिमन्यते ॥ २४२.७॥

अभिमानातिमानानां तथैव सुकृतान्यपि ।
एकवासाश्चतुर्वासाः शायी नित्यमधस्तथा ॥ २४२.८॥

मण्डूकशायी च तथा वीरासनगतस्तथा ।
वीरमासनमाकाशे तथा शयनमेव च ॥ २४२.९॥

इष्टकाप्रस्तरे चैव चक्रकप्रस्तरे तथा ।
भस्माप्रस्तरशायी च भूमिशय्यानुलेपनः ॥ २४२.१०॥

वीरस्थानाम्बुपाके च शयनं फलकेषु च ।
विविधासु च शय्यासु फलगृह्यान्वितासु च ॥ २४२.११॥

उद्याने खललाग्ने तु क्षौमकृष्णाजिनान्वितः ।
मणिवालपरीधानो व्याघ्रचर्मपरिच्छदः ॥ २४२.१२॥

सिंहचर्मपरीधानः पट्टवासास्तथैव च ।
फलकं(?)परिधानश्च तथा कटकवस्त्रधृक् ॥ २४२.१३॥

कटैकवसनश्चैव चीरवासास्तथैव च ।
वस्त्राणि चान्यानि बहून्यभिमत्य य बुद्धिमान् ॥ २४२.१४॥

भोजनानि विचित्राणि रत्नानि विविधानि च ।
एकरात्रान्तराशित्वमेककालिभोजनम् ॥ २४२.१५॥

चतुर्थाष्टमकालं च षष्ठकालिकमेव च ।
षड्रात्रभोजनश्चैव तथा चाष्टाहभोजनः ॥ २४२.१६॥

मासोपवासी मूलाशी फलाहारस्तथैव च ।
वायुभक्षश्च पिण्याकदधिगोमयभोजनः ॥ २४२.१७॥

गोमूत्रभोजनश्चैव काशपुष्पाशनस्तथा ।
शैवालभोजनश्चैव तथा चान्येन वर्तयन् ॥ २४२.१८॥

वर्तयञ्शीर्णपर्णैश्च प्रकीर्णफलभोजनः ।
विविधानि च कृच्छ्राणि सेवते सिद्धिकाङ्क्षया ॥ २४२.१९॥

चान्द्रायणानि विधिवल्लिङ्गानि विविधानि च ।
चातुराश्रम्ययुक्तानि धर्माधर्माश्रयाण्यपि ॥ २४२.२० ॥

उपाश्रयानप्यपरान्पाखण्डान्विविधानपि ।
विविक्ताश्च शिलाछायास्तथा प्रस्रवणानि च ॥ २४२.२१ ॥

पुलिनानि विविक्तानि विविधानि तपांसि च ।
यज्ञांश्च विविधाकारान्विद्याश्च विविधास्तथा ॥ २४२.२२ ॥

नियमान्विविधांश्चापि विविधानि तपांसि च ।
यज्ञांश्च विविधाकारान्विद्याश्च विविधास्तथा ॥ २४२.२३ ॥

वणिक्पथं द्विजक्षत्रवैश्यशूद्रांस्तथैव च ।
दानं च विविधाकारं दीनान्धकृपणादिषु ॥ २४२.२४ ॥

अभिमन्येत संधातुं तथैव विविधान्गुणान् ।
सत्त्वं रजस्तमश्चैव धर्मार्थौ काम एव च ॥ २४२.२५ ॥

यजनाध्ययने दानं तथैवाऽऽहुः प्रतिग्रहम् ।
याजनाध्यापने चैव तथाऽन्यदपि किंचन ॥ २४२.२६ ॥

यजनाध्ययने दानं तथैवाऽऽहुः प्रतिग्रहम् ।
याजनाध्यापने चैव तथाऽन्यदपि किंचन ॥ २४२.२७ ॥

जन्ममृत्युविधानेन तथा विशसनेन च ।
शुभाशुभमयं सर्वमेतदाहुः सनातनम् ॥ २४२.२८ ॥

प्रकृतिः कुरुते देवी भयं प्रलयमेव च ।
दिवसान्ते गुणानेतानतीत्यैकोऽवतिष्ठते ॥ २४२.२९ ॥

रश्मिजालमिवाऽऽदित्यस्तत्कालं संनियच्छति ।
एवमेवैष तत्सर्वं क्रीडार्थमभिमन्यते ॥ २४२.३० ॥

आत्मरूपगुणानेतान्विविधान्हृदयप्रियान् ।
एवमेतां प्रकुर्वाणः सर्गप्रलयधर्मिणीम् ॥ २४२.३१ ॥

क्रियां क्रियापथे रक्तस्त्रिगुणस्त्रिगुणाधिपः ।
क्रियाक्रियापतोपेतस्तथा तदिति मन्यते ॥ २४२.३२ ॥

प्रकृत्या सर्वमेवेदं जगदन्धीकृतं विभो ।

रजसा तमसा चैव व्याप्तं सर्वमनेकधा ॥ २४२.३३॥

एवं द्वंद्वान्यतीतानि मम वर्तन्ति नित्यशः ।
मत्त एतानि जायन्ते प्रलये यान्ति मामपि ॥ २४२.३४॥

निस्तर्तव्याण्थैतानि सर्वाणीति नराधिप ।
मन्यते पक्षबुद्धत्वात्तथैव सुकृतान्यपि ॥ २४२.३५॥

भोक्तव्यानि ममैतानि वेवलोकगतेन वै ।
इहैव चैनं भोक्ष्यामि शुभासुभफलोदयम् ॥ २४२.३६॥

सुखमेवं तु कर्तव्यं सकृत्कृत्वा सुखं मम॥

यावदेव तु मे सौख्यं जात्यां जात्यां भविष्यति ॥ २४२.३७॥

भविष्यति न मे दुःखं कृतेनेहाप्यनन्तकम् ।
सुखदुःखं हि मानुष्यं निरये चापि मज्जनम् ॥ २४२.३८॥

निरयाच्चापि मानुष्यं कालेनैष्याम्यहं पुनः ।
मनुष्यत्वाच्च देवत्वं देवत्वात्पौरुषं पुनः ॥ २४२.३९॥

मनुष्यत्वाच्च निरयं पर्यायेणोपगच्छति ।
एष एवं द्विजातीनामात्मा वै स गुणैर्वृतः ॥ २४२.४०॥

तेन देवमनुष्येषु निरयं चोपपद्यते ।
ममत्वेनाऽऽवृतो नित्यं तत्रैव परिवर्तते ॥ २४२.४१॥

सर्गकोटिसहस्राणि मरणान्तासु मूर्तिषु ।
य एवं कुरुते कर्म शूभाशुभफलात्मकम् ॥ २४२.४२॥

स एव फलमाप्नोति त्रिषु लोकेषु मूर्तिमान् ।
प्रकृतिः कुरुते कर्मशुभशुभफलात्मकम् ॥ २४२.४३॥

प्रकृतिश्च तथाऽऽनोति त्रिषु लोकेषु कामणा ।
तिर्यग्योनिमनुष्यत्वले देवलोके तथैव च ॥ २४२.४४॥

त्रीणि स्थानानि चैतानि जानीयात्प्राकृतानि ह ।
अलिङ्गप्रकृतित्वाच्च लिङ्गैरप्यनुमीयते ॥ २४२.४५॥

तथैव पौरुषं लिङ्गमनुमानाद्धि मन्यते ।
स लिङ्गान्तरमासाद्य प्राकृतं लिङ्गमव्रणम् ॥ २४२.४६॥

व्रणद्वाराण्यधिष्ठाय कर्माण्यात्मनि मन्यते ।
श्रोत्रादीनि तु सर्वाणि पञ्च कर्मेन्द्रियाण्यथ ॥ २४२.४७॥

रागादीनि प्रवर्तन्ते गुणेष्विह गुणैः सह ।
अहमेतानि वै कुर्वन्ममैतानीन्द्रियाणिह ॥ २४२.४८॥

निरिन्द्रियो हि मन्येत व्रणवानस्मि निर्व्रणः ।
अलिङ्गो लिङ्गमात्मानमकालं कालमात्मनः ॥ २४२.४९॥

असत्त्वं सत्त्वमात्मानममृतं मृतमात्मनः ।
अमृत्युं मृत्युमात्मात्मानमभवं भवमात्मनः ॥ २४२.५०॥

अक्षेत्रं क्षेत्रमात्मानमसङ्गं सङ्गमात्मनः ।
अतत्त्वं तत्त्वमात्मानमभवं भवमात्मनः ॥ २४२.५१॥

अक्षरं क्षरमात्मानमबुद्धत्वाद्धि मन्यते ।
एवमप्रतिबुद्धत्वादबुद्धजनसेवनात् ॥ २४२.५२॥

सर्गकोटिसहस्राणि पतनान्तानि गच्छति ।
जन्मान्तरसहस्राणि मरणान्तानि गच्छति ॥ २४२.५३॥

तिर्यग्योनिमनुष्यत्वे देवलोके तथैव च ।
चन्द्रमा इव कोशानां पुनस्तत्र सहस्रशः ॥ २४२.५४॥

नीयतेऽप्रतिबुद्धत्वादेवमेव कुबुद्धिमान् ।
कला पञ्चदशी योनिस्तद्धाम इति पठ्यते ॥ २४२.५५॥

नित्यमेव विजानीहि सोमं वै षोडशांशकैः ।
कलया जायतेऽजस्रं पुनः पुनरबुद्धिमान् ॥ २४२.५६॥

धीमांश्चायं न भवति नृप एवं हि जायते ।
षोडशी तु कला सूक्ष्मा स सोम उपधार्यताम् ॥ २४२.५७॥

न तूपयूज्यते देवैर्देवानपि युनक्ति सः ।
ममत्वं क्षपयित्वा तु जायते नृपसत्तम॥

प्रकृतेस्त्रिगुणायास्तु स एव त्रिगुणो भवेत् ॥ २४२.५८॥

इति श्रीमहापुराणे आदिब्राह्मे वसिष्ठकरालजनकसंवादे
द्विचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४२॥

रह्मपुराणम्

अध्यायः २४३ (१३५)

वशिष्ठं प्रति मोक्षधर्मविषयको जनकप्रश्नः

जनक उवाच

अक्षरक्षरयोरेष द्वयोः संबन्ध इष्यते ।
स्त्रीपुंसयोर्वा सम्बन्ध स वै पुरुष उच्यते ॥ २४३.१॥

ऋते तु पुरुषं नेह स्त्री गर्भान्धारयत्युत ।
ऋते स्त्रियं न पुरुषो रूपं निर्वर्तते तथा ॥ २४३.२॥

अन्योन्यस्याभिसंबन्धानयोन्यगुणसंश्रयात् ।
रूपं निर्वर्तयेदेतदेवं सर्वासु योनिषु ॥ २४३.३॥

रत्यर्थमतिसंयोगादन्योन्यगुमसंश्रयात् ।
ऋतौ निर्वर्तते रूपं तद्वक्ष्यामि निदर्शनम् ॥ २४३.४॥

ये गुणाः परुषस्येह ये च मातुर्गुणास्तथा ।
अस्थि स्नायु च मज्जा च जानीमः पितृतो द्विज ॥ २४३.५॥

त्वङ्मासशोणितं चेति मातृजान्यनुशुश्रुम ।
एवमेतद्विजश्रेष्ठ वेदशास्त्रेषु पठ्यते ॥ २४३.६॥

प्रमाणं यच्च वेदोक्तं शास्त्रोक्तं यच्च पठ्यते ।
वेदशास्त्रप्रमाणं च प्रमाणं तत्सनातनम् ॥ २४३.७॥

एवमेवाभिसम्बन्धौ नित्यं प्रकृतिपूरुषौ ।
यच्चापि भगवंस्तस्मान्मोक्षधर्मो न विद्यते ॥ २४३.८॥

अथवाऽनन्तरकृतं किंचिदेव निदर्शनम् ।
तन्ममाऽऽचक्ष्व तत्त्वेन प्रत्यक्षो ह्यसि सर्वदा ॥ २४३.९॥

मोक्षकामा वयं चापि काङ्क्षामो यदनामयम् ।
अजेयमजरं नित्यमतीन्द्रियमनीश्वरम् ॥ २४३.१०॥

वसिष्ठ उवाच

यदेतदुक्तं भवता वेदशास्त्रनिदर्शनम् ।
एवमेतद्यता वक्ष्ये तत्त्वग्राही यथा भवान् ॥ २४३.११॥

धार्यते हि त्वाया ग्रन्थ उभयोर्वेदशास्त्रयोः ।
न च ग्रन्थस्य तत्त्वज्ञो यथातत्त्वं नरेश्वर ॥ २४३.१२॥

यो हि वेदे च शास्त्रे च ग्रान्थधारणतत्परः ।
न च ग्रन्तार्थतत्त्वज्ञस्तस्य तद्धारणं वृथा ॥ २४३.१३॥

भारं स वहते तस्य ग्रन्थस्यार्थं न वेत्ति यः ।
यस्तु ग्रन्थार्थतत्त्वज्ञो नास्य ग्रन्थागमो वृथा ॥ २४३.१४॥

ग्रन्थस्यार्थं स पृष्टस्तु मादृशो वक्तुमर्हति ।
यथातत्त्वाभिगमनादर्थं तस्य स विन्दति ॥ २४३.१५॥

न यः समुत्सुकः कश्चिद्ग्रन्थार्थं स्थूलबुद्धिमान् ।
स कथं मन्दविज्ञानो ग्रन्थं वक्ष्यति निर्णयात् ॥ २४३.१६॥

अज्ञात्वा ग्रन्थतत्त्वानि वादं यः कुरुते नरः ।
लोभाद्वाऽप्यथवा दम्भात्स पापी नरकं व्रजेत् ॥ २४३.१७॥

निर्णयं चापि च्छिद्रात्मा न तद्वक्ष्यति तत्त्वतः ।
सोऽपीहास्यार्थतत्त्वज्ञो यस्मान्नैवाऽऽत्मवानपि ॥ २४३.१८॥

तस्मात्त्वं शृणु राजेन्द्र यथैतदनुदृश्यते ।
यथा तत्त्वेन सांख्येषु योगेषु च महात्मसु ॥ २४३.१९॥

यदेव योगाः पश्यन्ति सांख्यं तदनुगम्यते ।
एकं सांख्यां च योगं च यः यपश्यति स बुद्धिमान् ॥ २४३.२०॥

त्वङ्मांसं रुधिरं मेदः पित्तं मज्जाऽस्थि स्नायु च ।
एतदैन्द्रियकं तात यद्भवानित्थमात्थ माम् ॥ २४३.२१॥

द्रव्याद्द्रव्यस्य निर्वृत्तिरिन्द्रियादिन्द्रियं तथा ।
देहाद्देहमवाप्नोति बीजाद्बीजं तथैव च ॥ २४३.२२॥

निरिन्द्रियस्य बीजस्य निर्द्रव्यस्यापि देहिनः ।
कथं गुणा भविष्यन्ति निर्गुणत्वान्महात्मनः ॥ २४३.२३॥

गुणा गुणेषु जायन्ते तत्रैव विरमन्ति च ।
एवं गुणाः प्रकृतिजा जायन्ते न च यान्ति च ॥ २४३.२४॥

त्वङ्मांसं रुधिरं मेदः पित्तं मज्जाऽस्ति स्नायु च ।
अष्टौ तान्यथ शुक्रेण जानीहि प्राकृतेन वै ॥ २४३.२५॥

पुमांश्चैवापुमांस्चैव स्त्रीलिङ्गं प्राकृतं स्मृतम् ।
वायुरेष पुमांश्चैव रस इत्यभिधीयते ॥ २४३.२६॥

अलिङ्गा प्रकृतिर्लिङ्गैरुपलभ्यति साऽऽत्मजैः ।
यथा पुष्पफलैर्नित्यं मूर्तं चामूर्तयस्तथा ॥ २४३.२७॥

एवमप्यनुमानेन स लिङ्गमुपलभ्यते ।
पञ्चविंशतिकस्तात लिङ्गेषु नियतात्मकः ॥ २४३.२८॥

अनादिनिधनोऽनन्तः सर्वदर्शनकेवलः ।
केवलं त्वभिमानित्वाद्गुणेषु गुण उच्यते ॥ २४३.२९॥

गुणा गुणवतः सन्ति निर्गुणस्य कुतो गुणाः ।
तस्मादेवं विजानन्ति ये जना गुणदर्शिनः ॥ २४३.३०॥

यदा त्वेष गुणानेतान्प्राकृतानभिमन्यते ।
तदा स गुणवानेव गुणभेदान्प्रपश्यति ॥ २४३.३१॥

यत्तद्बुद्धेः परं प्राहुः सांख्ययोगं च सर्वशः ।
बुध्यमानं महाप्राज्ञाः प्रबुद्धपरिवर्जनात् ॥ २४३.३२॥

अप्रबुद्धं यथा व्यक्तं स्वगुणैः प्राहुरीश्वरम् ।
निर्गुणं चेश्वरं नित्यमधिष्ठातारमेव च ॥ २४३.३३॥

प्रकृतेश्च गुणानां च पञ्चविंशतिकं बुधाः ।
सांख्ययोगे च कुशला बुध्यन्ते परमैषिणः ॥ २४३.३४॥

यदा प्रबुद्धमव्यक्तमवस्थात(प)ननी(भी)रवः ।
बुध्यमानं न बुध्यन्तेऽवगच्छन्ति समं तदा ॥ २४३.३५॥

एतन्नदर्शनं सम्यङ्ग सम्यगनुदर्शनम् ।
बुध्यमानं प्रबुध्यन्ते द्वाभ्यां पृथगरिंदम ॥ २४३.३६॥

परस्परेणैतदुक्तं क्षराक्षरनिदर्शनम् ।
एकत्वदर्शनं चास्य नानात्वं चास्य दर्शनम् ॥ २४३.३७॥

पञ्चविंशतिनिष्ठोऽयं तदा सम्यक्प्रचक्षते ।
एकत्वदर्शनं चास्य नानात्वं चास्य दर्शनम् ॥ २४३.३८॥

तत्त्ववित्तत्त्वयोरेव पृथगेतन्निदर्शनम् ।

पञ्चविंसतिभिस्तत्त्वं तत्त्वमाहुर्मनीषिणः ॥ २४३.३९॥

निस्तत्त्वं पञ्चविंशस्य परमाहुर्मषिणः ।
वर्ज्यस्य वर्ज्यमाचारं तत्त्वं तत्त्वात्सनातनम् ॥ २४३.४०॥

करालजनक उवाच
नानात्वैकत्वमित्युक्तं त्वयैतद्विजसत्तम ।
पश्यतस्तद्धि संदिग्धमेतयोर्वै निदर्शनम् ॥ २४३.४१॥

तथा बुद्धप्रबुद्धाभ्यां बुध्यमानस्य चानघ ।
स्थूलबुध्या न पश्यामि तत्त्वमेतन्न संशयः ॥ २४३.४२॥

अक्षरक्षरयोरुक्तं त्वया यदपि कारणम् ।
तदप्यस्थिरबुद्धित्वात्प्रनष्टमिव मेऽनघ ॥ २४३.४३॥

तदेतच्छ्रोतुमिच्छामि नानात्वैकत्वदर्शनम् ।
द्वंद्वं चैवानिरुद्धं च बुध्यमानं च तत्त्वतः ॥ २४३.४४॥

विद्याविद्ये च भगवन्नक्षरं क्षरमेव च ।
सांख्ययोगं च कृत्स्नेन बुद्धाबुद्धिं पृथक्पृथक् ॥ २४३.४५॥

वसिष्ठ उवाच
हन्त ते सम्प्रवक्ष्यामि यदेतदनुपृच्छसि ।
योगकृत्यं महाराज पृथगेव श‍ृणुष्व मे ॥ २४३.४६॥

योगकृत्यं तु योगानां ध्यानमेव परं बलम् ।
तच्चापि द्विविधं ध्यानमाहुर्विद्याविदो जनाः ॥ २४३.४७॥

एकग्रता च मनसः प्राणायामस्तथैव च ।
प्राणायामस्तु सगुणो निर्गुणो मानसस्तथा ॥ २४३.४८॥

मूत्रोत्सर्गे पुरीषे च भोजने च नराधिप(?) ।
द्विकालं नोपभुञ्जीत शेषं भुञ्जीत तत्परः ॥ २४३.४९॥

इन्द्रियाणीन्द्रियार्थेभ्यो निवर्त्य मनसा मुनिः ।
दशद्वादशभिर्वाऽपि चतुर्विंशात्परं यतः ॥ २४३.५०॥

स चोदनाभिर्मतिमान्नात्मानं चोदयेदथ ।
तिष्ठन्तमजरं तं तु यत्तदुक्तं मनीषिभिः ॥ २४३.५१॥

विश्वात्मा सततं ज्ञेय इत्येवमनुसुश्रुम ।

द्रव्यं ह्यहीनमनसो नान्यथेति विनिश्चयः ॥ २४३.५२॥

विमुक्तः सर्वसङ्गेभ्यो लवाहारो जितेन्द्रियः ।
पूर्वरात्रे पार्धे च धारयीत मनो हृदि ॥ २४३.५३॥

स्थिरीकृत्येन्द्रियग्रामं मनसा मिथिलेश्वर ।
मनो बुद्ध्या स्थिरं कृत्वा पाषाण इव निश्चलः ॥ २४३.५४॥

स्थाणुवच्चाप्यकम्प्यः स्याद्दारुवच्चापि निश्चलः ।
बुद्ध्या विधिविधानज्ञास्ततो युक्तं प्रचक्षते ॥ २४३.५५॥

न शृणोति न चाऽऽघ्राति न च पश्यति किंचन ।
न च सपर्शं विजानाति न च संकल्पते मनः ॥ २४३.५६॥

न चापि मन्यते किंचिन्न च बुध्येत काष्ठवत् ।
तदा प्रकृतिमापन्नं युक्तमाहुर्मनीषिणः ॥ २४३.५७॥

न भाति हि यथा दीपो दीप्तिस्तद्वच्च दृश्यते ।
निलिङ्गस्चाधश्चोर्ध्वं च तिर्यग्गतिमवाप्नुयात् ॥ २४३.५८॥

तदा तदुपपन्नश्च यस्मिन्दृष्टे च कथ्यते ।
हृदयस्थोऽन्तरात्मेति ज्ञेयो ज्ञस्तात मद्विधैः ॥ २४३.५९॥

निर्धूम इव सप्तार्चिरादित्य इव रश्मिवान् ।
वैद्युतोऽग्निरिवाऽकाशे पस्यत्यात्मानमात्मनि ॥ २४३.६०॥

यं पस्यन्ति महात्मानो धृतिमन्तो मनीषिणः ।
ब्राह्मणा ब्रह्मयोनिस्था ह्ययोनिममृतात्मकम् ॥ २४३.६१॥

तदेवाऽऽहुरणुभ्योऽणु तन्महद्भ्यो महत्तरम् ।
सर्वत्र सर्वभूतेषु ध्रुवं तिष्ठन्न दृश्यते ॥ २४३.६२॥

बुद्धिद्रव्येण दृश्येन मनोदीपेन लोककृत् ।
महतस्तमसस्ततात पारे तिष्ठन्न तामसः ॥ २४३.६३॥

तमसो दूर इत्युक्तस्तत्त्वज्ञैर्वेदपारगैः ।
विमलो विमतश्चैव निर्लिङ्गोऽलिङ्गसंज्ञकः ॥ २४३.६४॥

योग एष हि लोकानां किमन्यद्योगलक्षणम् ।
एवं पश्यन्प्रपश्येन आत्मानमजरं परम् ॥ २४३.६५॥

योगदर्शनमेतावदुक्तं ते तत्त्वतो मया ।
सांख्यज्ञानं प्रवक्ष्यामि परिसंख्यानिदर्शनम् ॥ २४३.६६ ॥

अव्यक्तमाहुः प्रख्यानं परां प्रकृतिमात्मनः ।
तस्मान्महात्समुत्पन्नं द्वितीयं राजसत्तम ॥ २४३.६७॥

अहंकारस्तु महतस्तृतीय इति नः श्रुतम् ।
पञ्चभूतान्यहंकारादाहुः सांख्यात्मदर्शिनः ॥ २४३.६८॥

एताः प्रकृतयस्त्वष्टौ विकाराश्चापि षोडश ।
पञ्च चैव विशेषाश्च तथा पञ्चेन्द्रियाणि च ॥ २४३.६९॥

एतावदेव तत्त्वानां सांख्यमाहुर्मनीषिणः ।
सांख्ये सांख्यविधानज्ञा नित्यं सांख्यपथे स्थिताः ॥ २४३.७०॥

यस्माद्यदभिजायेत तत्तत्रैव प्रलीयते ।
लीयन्ते प्रतिलोमानि गृह्यन्ते चान्तरात्मना ॥ २४३.७१ ॥

आनुलोम्येन जायन्ते लीयन्ते प्रतिलोमतः ।
गुणा गुणेषु सततं सागरस्योर्मयो यथा ॥ २४३.७२॥

सर्गप्रलय एतावान्प्रकृतेर्नृपसत्तम ।
एकत्वं प्रलये चास्य बहुत्वं च तथा सृजि ॥ २४३.७३॥

एवमेव च राजेन्द्र विज्ञेयं ज्ञानकोविदैः ।
अधिष्ठातारमव्यक्तमस्याप्येतन्निदर्शनम् ॥ २४३.७४॥

एकत्वं च बहुत्वं च प्रकृतेरनुतत्त्ववान् ।
एकत्वं प्रलये चास्य बहुत्वं च प्रवर्तनात् ॥ २४३.७५॥

बहुलाऽऽत्मा राजेन्द्र प्रोच्यते यतिसत्तमैः ।
अधिष्ठानादधिष्ठाता क्षेत्राणामिति नः श्रुतम् ॥ २४३.७६ ॥

अधिष्ठातेति राजेन्द्र प्रोच्यते यतिसत्तमैः ।
अधिष्ठानादधिष्ठाता क्षेत्राणामिति नःश्रुतम् ॥ २४३.७७॥

क्षेत्रं जानाति चाव्यक्तं क्षेत्रज्ञ इति चोच्यते ।
अव्यक्तिके पुरे शेते पुरुषश्चेति कथ्यते ॥ २४३.७८॥

अन्यदेव च क्षेत्रं स्यादन्यः क्षेत्रज्ञ उच्यते ।
क्षेत्रमव्यक्त इत्युक्तं ज्ञातारं पञ्चविंशकम् ॥ २४३.७९॥

अन्यदेव च ज्ञानं स्यादन्यज्ज्ञेयं तदुच्यते ।
ज्ञानमव्यक्तमित्युक्तं ज्ञेयो वै पञ्चविंशकम् ॥ २४३.८०॥

अव्यक्तं क्षेत्रमित्युक्तं तथा सत्त्वं तथेश्वरम् ।
अनीश्वरमतत्त्वं च तत्त्वं तत्पञ्चविंशकम् ॥ २४३.८१॥

सांख्यदर्शनमेतावत्परिसंख्या न विद्यते ।
संख्यां प्रकुरुते चैव प्रकृतिं च प्रवक्ष्यते ॥ २४३.८२॥

चत्वारिंशच्चतुर्विंशत्प्रतिसंख्याय तत्त्वतः ।
संख्या सहस्रकृत्या तु निस्तत्त्वः पञ्चविंशकः ॥ २४३.८३॥

पञ्चविंशत्प्रबुद्धात्मा बुध्यमान इति श्रुतः ।
यदा बुध्यति आत्मानं तदा भवति केवलः ॥ २४३.८४॥

सम्यग्दर्शनमेतावद्भाषितं तव तत्त्वतः ।
एवमेतद्विजानन्तः साम्यतां प्रतियान्त्युत ॥ २४३.८५॥

सम्यङ्निदर्शनं नाम प्रत्यक्षं प्रकृतेस्तथा ।
गुणवत्त्वाद्यथैतानि निर्गुणेभ्यस्तथा भवेत् ॥ २४३.८६॥

सम्यङ्निदर्शनं नाम प्रत्यक्षं प्रकृतेस्तथा ।
गुणवत्त्वाद्यथैतानि निर्गुणेभ्यस्तथा भवेत् ॥ २४३.८७॥

पश्यन्त्यमतयो ये नच सम्यक्तेषु च दर्शनम् ।
ते व्यक्तिं प्रतिपद्यन्ते पुनः पुनररिंदम ॥ २४३.८८॥

सर्वमेतद्विजानन्तो न सर्वस्य प्रबोधनात् ।
व्यक्तिभूता भविष्यन्ति व्यक्तस्यैवानुवर्तनात् ॥ २४३.८९॥

सर्वमव्यक्तमित्युक्तमसर्वः पञ्चविंशकः ।
य एवमभिजानन्ति न भयं तेषु विद्यते ॥ २४३.९०॥

इति श्रीमहापुराणे आदिब्राह्मे वसिष्ठकरालजनकसंवादे
त्रिचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४३॥

अध्यायः २४४ (१३६)

विद्याविद्ययोःस्वरूपकथनम्

वसिष्ठ उवाच
सांख्यदर्शनमेतावदुक्तं ते नृपसत्तम ।
विद्याविद्ये त्विदानीं मे त्वं निबोधानुपूर्वशः ॥ २४४.१ ॥

अभेद्यमाहुरव्यक्तं सर्गप्रलयधर्मिणः ।
सर्गप्रलय इत्युक्तं विद्याविद्ये च विंशकः ॥ २४४.२ ॥

परस्परस्य विद्या वै तन्निबोधानुपूर्वशः ।
यथोक्तमृषिभिस्तात सांख्यस्यातिनिदर्शनम् ॥ २४४.३ ॥

कर्मेन्द्रियाणां सर्वेषां विद्या बुद्धीन्द्रियं स्मृतम् ।
बुद्धीन्द्रियाणां च तथा विशषा इति नः श्रुतम् ॥ २४४.४ ॥

विषयाणां मनस्तेषां विद्यामाहुर्मनीषिणः ।
मनसः पञ्च भूतानि विद्या इत्यभिचक्षते ॥ २४४.५ ॥

अहंकारस्तु भूतानां पञ्चानां नात्र संशयः ।
अहंकारस्तथा विद्या बुद्धिर्विद्या नरेश्वर ॥ २४४.६ ॥

बुध्या प्रकृतिरव्यक्तं तत्त्वानां परमेश्वरः ।
विद्या ज्ञेया नरश्रेष्ठ विधिश्च परमः स्मृतः ॥ २४४.७ ॥

अव्यक्तमपरं प्राहुर्विद्या वै पञ्चविंशकः ।
सर्वस्य सर्वमित्युक्तं ज्ञेयज्ञानस्य पारगः ॥ २४४.८ ॥

ज्ञानमव्यक्तमित्युक्तं ज्ञेयं वै पञ्चविंसकम् ।
तथैव ज्ञानमव्यक्तं विज्ञाता पञ्चविंशकः ॥ २४४.९ ॥

विद्याविद्ये तु तत्त्वेन मयोक्ते वै विशेषतः ।
अक्षरं च क्षरं चैव यदुक्तं तन्निबोध मे ॥ २४४.१० ॥

उभावेतौ क्षरावुक्तौ उभावेतावन(था)क्षरौ ।
कारणं तु प्रवक्ष्यामि यथाज्ञानं तु ज्ञानतः ॥ २४४.११ ॥

अनादिनिधनावेतौ उभावेवेश्वरौ मतौ ।
तत्त्वसंज्ञावुभावेव प्रोच्यते ज्ञानचिन्तकैः ॥ २४४.१२ ॥

सर्गप्रलयधर्मित्वादव्यक्तं प्राहुरव्ययम् ।
तदेतद्गुणसर्गाय विकुर्वाणं पुनः पुनः ॥ २४४.१३ ॥

गुणानां महदादीनामुत्पद्यति परस्परम् ।

अधिष्ठानं क्षेत्रमाहुरेतद्वै पञ्चविंशकम् ॥ २४४.१४॥

यदन्तर्गुणजालं तु तद्व्यक्तात्मनि संक्षिपेत् ।
तदहं तद्गुणैस्तस्तु पञ्चविंशे विलीयते ॥ २४४.१५॥

गुणा गुणेषु लीयन्ते तदेका प्रकृतिर्भवेत् ।
क्षेत्रज्ञोऽपि तदा तावत्क्षेत्रज्ञः सम्प्रणीयते ॥ २४४.१६॥

यदाऽक्षरं प्रकृतिर्यं गच्छते गुणसंज्ञिता ।
निर्गुणत्वं च वै देहे गुणेषु परिवर्तनात् ॥ २४४.१७॥

एवमेव च क्षेत्रज्ञः क्षेत्रज्ञानपरिक्षयात् ।
प्रकृत्या निर्गुणस्त्वेष इत्येवमनुशुश्रुम ॥ २४४.१८॥

क्षरो भवत्येष यदा गुणवती गुणेष्वथ ।
प्रकृतिं त्वथ जनाति निर्गुणत्वं तथात्मनः ॥ २४४.१९॥

तथा विशुद्धो भवति प्रकृते परिवर्जनात् ।
अन्योऽहमन्येयमिति यदा बुध्यति बुद्धिमान् ॥ २४४.२०॥

तदैषोऽव्यथतामेति न च मिश्रत्वमाव्रजेत् ।
प्रकृत्या चैष राजेन्द्र मिश्रोऽन्योऽन्यस्य दृश्यते ॥ २४४.२१॥

यदा तु गुणजालं तत्प्राकृतं विजुगुप्सते ।
पश्यते च परं पश्यंस्तदा पश्यंस्तदा पश्यन्न संसृजेत् ॥ २४४.२२॥

किं मया कृतमेतावद्योऽहं कालनिमज्जनः ।
यथा मत्स्यो ह्यभिज्ञानादनुवर्तितवाञ्जलम् ॥ २४४.२३॥

अहमेव हि संमोहादन्यमन्यं जनाज्जनम् ।
मत्स्यो यथोदकज्ञानादनुवर्तितवानिह ॥ २४४.२४॥

मत्स्योऽन्यत्वमथाज्ञानादुदकान्नाभिमन्यते ।
आत्मानं तदवज्ञानादन्यं चैव न वेद्म्यहम् ॥ २४४.२५॥

ममास्तु धिक्कुबुद्धस्य योऽहं मग्न इमं पुनः ।
अनुवर्तितवान्मोहादन्यमन्यं जनाज्जनम् ॥ २४४.२६॥

अयमनुभवेद्बन्धुरनेन सह मे भयम् ।
साम्यमेकत्वातं यातो यादृशस्तादृशस्त्वहम् ॥ २४४.२७॥

तुल्यतामिह पश्यामि सदृशोऽहमनेन वै ।
अयं हि विमलो व्यक्तमहमीदृशकस्तदा ॥ २४४.२८॥

योऽहमज्ञानसंमोहादज्ञया सम्प्रवृत्तवान् ।
संसर्गादतिसंसर्गात्स्थितः कालमिमं त्वहम् ॥ २४४.२९॥

सोऽहमेवं वशीभूतः कालमेतं न बुद्धवान् ।
उत्तमाधममध्यानां तामहं कथमावसे ॥ २४४.३०॥

समानमायया चेह सहवासमहं कथम् ।
गच्छाम्यबुद्धभावत्वादिहेदानीं स्थिरो व ॥ २४४.३१॥

सहवासं न यास्यामि कालमेतं विवञ्चनात् ।
वञ्चितो ह्यनया यद्धि निर्विकारो विकारया ॥ २४४.३२॥

न तत्तदपराद्धं स्यादपराधो ह्ययं मम ।
योऽहमत्रभवं सक्तः पराङ्मुखमुपस्थितः ॥ २४४.३३॥

ततोऽस्मिन्बहुरूपोऽथ स्थितो मूर्तिरमूर्तिमान् ।
अमूर्तिश्चाप्यमूर्तात्मा ममत्वेन प्रधर्षितः ॥ २४४.३४॥

प्रकृत्या च तया तेन तासु तास्विह योनिषु ।
निर्ममस्य ममत्वेन विकृतं तासु तासु च ॥ २४४.३५॥

योनिषु वर्तमानेन नष्टसंज्ञेन चेतसा ।
समता न मया काचिदहंकारे कृता मया ॥ २४४.३६॥

आत्मानं बहुधा कृत्वा सोऽयं भूयो युनक्ति माम् ।
इदानीमवबुद्धोऽस्मि निर्ममो निरहंकृतः ॥ २४४.३७॥

ममत्वं मनसा नित्यमहंकारकृतात्मकम् ।
अपलग्नामिमां हित्वा संश्रयिष्ये निरामयम् ॥ २४४.३८॥

अनेन साम्यं यास्यामि नानयाऽहमचेतसा ।
क्षेमं मम सहानेन नैवैकमनया सह ॥ २४४.३९॥

एवं परमसंबोधात्पञ्चविंशोऽनुबुद्धवान् ।
अक्षरत्वं निगच्छति त्यक्त्वा क्षरमनामयम् ॥ २४४.४०॥

अव्यक्तं व्यक्तधर्माणं सगुणं निर्गुणं तथा ।
निर्गुणं प्रथमं दृष्ट्वा तादृग्भवति मैथिल ॥ २४४.४१॥

अक्षरक्षरयोरेतदुक्तं तव निदर्शनम् ।
मयेह ज्ञानसम्पन्नं यथा श्रुतिनिद्रशनात् ॥ २४४.४२॥

निःसंदिग्धं च सूक्ष्मं च विशुद्धं विमलं तथा ।
प्रवक्ष्यामि तु ते भूयस्तन्निबोध यथाश्रुतम् ॥ २४४.४३॥

सांख्ययोगो मया प्रोक्तः शास्त्रद्वयनिदर्शनात् ।
यदेव सांक्यशास्त्रोक्तं योगदर्शनमेव तत् ॥ २४४.४४॥

प्रबोधनपरं ज्ञानं सांख्यानामवनीपते ।
विस्पष्टं प्रोच्यते तत्र शिष्याणां हितकाम्यया ॥ २४४.४५॥

बृहच्चैवमिदं शास्त्रमित्याहुर्विदुषो जनाः ।
अस्मिंश्च शास्त्रे योगानां पुनर्भवपुरःसरम् ॥ २४४.४६॥

पञ्चविंशात्परं तत्त्वं पठ्यते च नराधिप ।
सांख्यानां तु परं तत्त्वं यथावदनुवर्णितम् ॥ २४४.४७॥

बुद्धमप्रतिबुद्धं च बुध्यमानं च तत्त्वतः ।
बुध्यमानं च बुद्धत्वं प्राहुर्योगनिदर्शनम् ॥ २४४.४८॥

बुद्धमप्रतिबुद्धं च बुध्यमानं च तत्त्वतः ।
बुध्यमानं च बुद्धत्वं प्राहुर्योगनिदर्शनम् ॥ २४४.४९॥

इति श्रीमहापुराणे आदिब्राह्मे वसिष्ठकरालजनकसंवादे
चतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४४॥

---

अध्यायः २४५ (१३७)

अजस्यापि विक्रियया नानाभवनम्

वसिष्ठ उवाच

अप्रबुद्धमथाव्यक्तमिमं गुणनिधिं सदा ।
गुणानां धार्यतां तत्त्वं सृजत्याक्षिपते तथा ॥ २४५.१॥

अजो हि क्रीडया भूप विक्रियां प्राप्त इत्युत ।
आत्मानं बहुधा कृत्वा नानेन प्रतिचक्षते ॥ २४५.२॥

एतदेवं विकुर्वाणो बुध्यमानो न बुध्यते ।

गुणानाचरते ह्येष सृजत्याक्षिपते तथा ॥ २४५.३॥

अव्यक्तबोधनाच्चैव बुध्यमानं वदन्त्यपि ।
न त्वेवं बुध्यतेऽव्यक्तं सगुणं तात निर्गुणम् ॥ २४५.४॥

कदाचित्त्वेव खल्वेतत्तदाहुः प्रतिबुद्धकम् ।
बुध्यते यदि चाव्यक्तमेतद्वै पञ्चविंशकम् ॥ २४५.५॥

बुध्यमानो भवत्येष ममात्मक इति श्रुतः ।
अन्योन्यप्रतिबुद्धेन वदन्त्यव्यक्तमच्युतम् ॥ २४५.६॥

अव्यक्तबोधनाच्चैव बुध्यमानं वदन्त्युत ।
पञ्चविंशं महात्मनां न चासावपि बुध्यते ॥ २४५.७॥

षड्विंशं विमलं बुद्धमप्रमेयं महाद्युते ।
सततं पञ्चविंशं तु चतुर्विंशं विबुध्यते ॥ २४५.८॥

दृश्यादृश्ये ह्यनुगततत्स्वभावे महाद्युते ।
अव्यक्तं चैव तद्ब्रह्म बुध्यते तात केवलम् ॥ २४५.९॥

पञ्चविंशं चतुर्विंशमात्मानमनुपश्यति ।
बुध्यमानो यदाऽऽत्मानमन्याऽहमिति मन्यते ॥ २४५.१०॥

तदा प्रकृतिमानेष भवत्यव्यक्तलोचनः ।
बुध्यते च परां बुद्धिं विशुद्धाममलां यथा(दा) ॥ २४५.११॥

षड्विंशं राजशार्दूल तदा बुद्धः कृतो व्रजेत् ।
ततस्त्यजति सोऽव्यक्तसर्गप्रलयधर्मिणम् ॥ २४५.१२॥

निर्गुणां प्रकृतिं वेद गुणयुक्तामचेतनाम् ।
ततः केवलधर्माऽसौ भवत्यव्यक्तदर्शनात् ॥ २४५.१३॥

केवलेन समागम्य विमुक्तात्मानमाप्नुयात् ।
एतत्तु तत्त्वमित्याहुर्निस्तत्त्वमजरामरम् ॥ २४५.१४॥

तत्त्वसंश्रवणादेव तत्त्वज्ञो जायते नृप ।
पञ्चविंशतितत्त्वानि प्रवदन्ति मनीषिणः ॥ २४५.१५॥

न चैव तत्त्ववांस्तात संसारेषु निमज्जति ।
एषामुपैति तत्त्वं हि क्षिप्रं बुध्यस्व लक्षणम् ॥ २४५.१६॥

षड्विंशोऽयमिति प्राज्ञो गृह्यमाणोऽजरामरः ।
केवलेन बलेनैव समतां यात्यसंशयम् ॥ २४५.१७॥

षड्विंशेन प्रबुद्धेन बुध्यमानोऽप्यबुद्धिमान् ।
एतन्नानात्वमित्युक्तं सांख्यश्रुतिनिदर्शनात् ॥ २४५.१८॥

चेतनेन समेतस्य पञ्चविंशतिकस्य ह ।
एकत्वं वै भवेत्तस्य यदा बुद्ध्याऽनुबुध्यते ॥ २४५.१९॥

बुध्यमानेन बुद्धेन समतां याति मैतिल ।
सङ्गधर्मा भवत्येष निःसङ्गात्मा नराधिप ॥ २४५.२०॥

निःसङ्गात्मानमासाद्य षड्विंशं कर्मज विदुः ।
विभुस्त्यजति चाव्यक्तं यदा त्वेतद्विबुध्यते ॥ २४५.२१॥

चतुर्विंशमगाधं च षड्विंशस्य प्रबोधनात् ।
एष ह्यप्रतिबुद्धश्च बुध्यमानस्तु तेऽनघ ॥ २४५.२२॥

उक्तो बुद्धश्च तत्त्वेन यथाश्रुतिनिदर्शनात् ।
मशकोदुम्बरे यद्वदन्यत्वं तद्वदेतयोः(कता) ॥ २४५.२३॥

मत्स्योदकं यथा तद्वदन्यत्पमुपलभ्यते ।
एवमेव च गन्तव्यं नानात्वैकत्वमेतयोः ॥ २४५.२४॥

एतावन्मोक्ष इत्युक्तो ज्ञानविज्ञानसंज्ञितः ।
पञ्चविंशतिकस्याऽऽशु योऽयं देहे प्रवर्तते ॥ २४५.२५॥

एष मोक्षयितव्येति प्राहुरव्यक्तगोचरात् ।
सोऽयमेवं विमुच्येत नान्यथेति विनिश्चयः ॥ २४५.२६॥

परश्च परधर्मा च भवत्येव समेत्य वै ।
विशुद्धधर्माशुद्धेन नाशुद्धेन च बुद्धिमान् ॥ २४५.२७॥

विमुक्तधर्मा बुद्धेन समेत्य पुरुषर्षभ ।
वियोगधर्मिणा चैव विमुक्तात्मा भवत्यथ ॥ २४५.२८॥

विमोक्षिणा विमोक्षश्च समेत्येह तथा भवेत् ।
शुचिकर्मा शुचिश्चैव भवत्यमितबुद्धिमान् ॥ २४५.२९॥

विमलात्मा च भवति समेत्य विमलात्मना ।
केवलात्मा तथा चैव केवलेन समेत्य वै॥

स्वतन्त्रश्च स्वतन्त्रेण स्वतन्त्रत्वमवाप्यते ॥ २४५.३०॥

एतावदेतत्कथितं मया ते तथ्यं महाराज यथार्थतत्त्वम् ।
अमत्सरस्त्वं प्रतिगृह्य बुद्ध्या, सनातनं ब्रह्म विशुद्धमाद्यम् ॥ २४५.३१॥

तद्वेदनिष्ठस्य जनस्य राजन्, प्रदेयमेतत्परमं त्वया भवेत् ।
विधित्सामानाय निबोधकारकं, प्रबोधहेतोः प्रणतस्य शासनम् ॥ २४५.३२॥

न देयमेतच्च यथाऽनृतात्मने, शठाय क्लीबाय न जिह्मबुद्धये ।
न पण्डितज्ञानपरोपतापिने, देयं तथा शिष्यविबोधनाय ॥ २४५.३३॥

श्रद्धान्वितायाथ गुणान्विताय, परापवादाद्विरताय नित्यम् ।
विशुद्धयोगाय बुधाय चैव, कृपावतेऽथ क्षमिणे हिताय ॥ २४५.३४॥

विविक्तशीलाय विधिप्रिययाय, विवादहीनाय बहुश्रुताय ।
विनीतवेशाय नहैतुकात्मने, सदैव गृह्यं त्विदमेव देयम् ॥ २४५.३५॥

एतैर्गुणैर्हीनतमे न देयमेतत्परं ब्रह्म विशुद्धमाहुः ।
न श्रेयसे योक्ष्यति तादृशे कृतं, धर्मप्रवक्तारमपात्रदानात् ॥ २४५.३६॥

पृथ्वीमिमां वा यदि रत्नपूर्णां,दद्याददेयं त्विदमव्रताय ।
जितेन्द्रियाय प्रयताय देयं, देयं परं तत्त्वविदे नरेन्द्र ॥ २४५.३७॥

कराल मा ते भयमस्ति किंचिदेतच्छ्रुतं ब्रह्म परं त्वयाऽद्य ।
यथावदुक्तं परमं वपित्रं, विशोकमत्यन्तमनादिमध्यम् ॥ २४५.३८॥

अगाधमेतदजरामरं च, निरामयं वीतभयं शिवं च ।
समीक्ष्य मोहं परवादसंज्ञमेतस्य तत्त्वार्थमिमं विदित्वा ॥ २४५.३९॥

अवाप्तमेतद्धि पुरा सनातनाद्धिरण्यगर्भाद्धि ततो नराधिप ।
प्रसाद्य यत्नेन तमुग्रतेजसं, सनातनं ब्रह्म यथा त्वयैतत् ॥ २४५.४०॥

पृष्टस्त्वया चाऽस्मि यथा नरेन्द्र, तथा मयेदं त्वयि नोक्तमन्यत् ।
यथाऽवाप्तं ब्रह्मणो मे नरेन्द्र, महाज्ञानं मोक्षविदां परायणम् ॥ २४५.४१॥

एतदुक्तं परं ब्रह्म यस्मान्नाऽवर्तते पुनः ।
पञ्चविंशं मुनिश्रेष्ठा वसिष्ठेन यथा पुरा ॥ २४५.४२॥

पुनरावृत्तिमाप्नोति परमं ज्ञानमव्ययम् ।
नाति बुध्यति तत्त्वेन बुध्यमानोऽजरामरम् ॥ २४५.४३॥

एतन्निःश्रेयसकरं ज्ञानं परमं मया ।
कथितं तत्त्वतो विप्राः श्रुत्वा देवर्षितो द्विजाः ॥ २४५.४४॥

हिरण्यगर्भादृषिणा वसिष्ठेन समाहृतम् ।
वसिष्ठादृषिसार्दूलो नारदोऽवाप्तवानिदम् ॥ २४५.४५॥

नारदाद्विदितं मह्यमेतदुक्तं सनातनम् ।
मा शुचध्वं मुनिश्रेष्ठाः श्रुत्वैतत्परमं पदम् ॥ २४५.४६॥

येन क्षराक्षरे भिन्ने न भयं तस्य विद्यते ।
विद्यते तु भयं यस्य यो नैनं वेत्ति तत्त्वतः ॥ २४५.४७॥

अविज्ञानाच्च मूढात्मा पुनः पुनरुपद्रवान् ।
प्रेत्य जातिसहस्राणि मरणान्तान्युपाश्नुते ॥ २४५.४८॥

देवलोकं तथा तिर्यङ्मानुष्यमपि चाश्नुते ।
यदि वा मुच्यते वाऽपि तस्मादज्ञानसागरात् ॥ २४५.४९॥

अज्ञानसागरे घोरे ह्यव्यक्तागाध उच्यते ।
अहन्यहनि मज्जन्ति यत्र भूतानि भो द्विजाः ॥ २४५.५०॥

तस्मादगाधादव्यक्तादुपक्षीणात्सनातनात् ।
तस्माद्युयं विरजसका वितमस्काश्च भो द्विजाः ॥ २४५.५१॥

एवं मया मुनिश्रेष्ठाः सारात्सारतरं परम् ।
कथितं परमं मोक्षं यं ज्ञात्वा न निवर्तते ॥ २४५.५२॥

न नास्तिकाय दातव्य नाभक्ताय कदाचन ।
न दुष्टमतये विप्रा न श्रद्धाविमुखाय च ॥ २४५.५३॥

इति श्रीमहापुराणे आदिब्राह्मे वसिष्ठकरालजनकसंवादसमाप्तिनिरूपणं नाम पञ्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४५॥

adhyAya numbering is different with gautamI mAhAtmya with 105 adhyAyas are inserted from 70th adhyAya in the encoding.
Compare with adhyAya 126-137 in the printed book
https://archive.org/details/BrahmaPurana
are given as 234-245 above.

*.. Vyasagita from Brahma Purana ..*

pdf was typeset on December 9, 2017

Please send corrections to *sanskrit@cheerful.com*